सोमः प्रथमो विविदे गन्धर्वस्ततो ऽपरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ सोमो ददद्गन्धर्वाय गन्धर्वो ऽग्नये ददत्[4] । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्[5] ॥ सरस्वति प्रेदमव सुभगे वाजिनीवति[6] । तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रत इत्यथैनौ अक्ष्णाभिमन्त्रयते समितं संकल्पेथां[7] सं वां सृजामि हृदये । संसृष्टं मनो अस्तु वां संसृष्टः प्राणो अस्तु वामित्यथैनामश्मानमास्थापयत्यातिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । प्रमृणीहि[8] दुरस्यून्सहस्व[9] पृतनायत इति[10] ' प्रदक्षिणमग्निं परिणयति विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इत्यथास्या भ्राताञ्जलिनाञ्जलावुपस्तीर्णाभिघारितान्लाजानावपतीयं[11] नार्युपब्रूते ऽग्नौ लाजानावपन्ती । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो

---

1) Thus N Pr, G *ta* 2) G *visryātai*, N विस्रयात्तं ; Pr *visrayātam* 3) Thus G Pr, N शेपं 4) Thus N Pr, *dadat* 5) Thus G, N Pr *paśūmśca mahyam putrāmścāgnirdadātvatho tvām* 6) Thus Pr, G N °*vati* 7) Thus N Pr, G *sakalpayatām*, Bh *samkalpayathām* See TS. IV. 2. 5 1 8) Thus Pr, G N *pravrnihi* 9) Thus N Pr, G *tirasyūn*° 10) Thus Pr, G N *prtanāyatiti* 11) G ins *nāriti* | *iyan*, see introd

मम ॥ भगेन त्वा संसृजामि मासरेण सुरामिवेत्यैनां वाचयतीमान्ल्लाजानावपामि समृद्धिकरणान्मम[1] । तुभ्यं च संवननांस्तदग्निरनुमन्यतामियं[2] स्वाहेत्येवमेव त्रिरास्थापयति त्रिः परिणयति त्रिरावपत्यैनां[3] प्राचीं वोदीचीं वा ॥ १६ ॥

सप्त पदानि प्रक्रमयत्येकमिषे विष्णुस्त्वान्वेतु द्वे ऊर्जे विष्णुस्त्वान्वेतु त्रीणि व्रताय विष्णुस्त्वान्वेतु चत्वारि मायोभवाय विष्णुस्त्वान्वेतु पञ्च पशुभ्यो विष्णुस्त्वान्वेतु षड्रायस्पोषाय विष्णुस्त्वान्वेतु सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेत्विति । सप्तमे पदे समीक्षमाणो जपति सखा[4] सप्तपदा[4] भव[4] सखायौ सप्तपदाबभूव[5] । सख्यं ते गमेयं सख्यात्ते मा योषं सख्यान्मे मा योष्ठा इत्यथास्या[6] दक्षिणमंसं प्रति धाङ्गमन्ववहृत्य हृदयदेशमभिमृशति मम हृदये हृदयं ते अस्तु मम चित्ते चित्तमस्तु ते । मम वाचमेकमना शृणु ममेवानुव्रता भव सहचर्या मया भवेत्यथास्या दक्षिणं कर्णमाजपति मां ते चित्तं प्रविशतु मां चक्षुर्मामु ते मनः । मयि सर्वाणि भूतानि मयि प्रज्ञानमस्तु ते ॥

1) Thus N, Pr °*karaṇāmama* G °*kāraṇammama* 2) Thus G Pr, N संवनना मद्° 3) N त्रिरावप° 4) Thus G Bh N Pr om
5) Thus N, G *sakhī ya saptapadā babhūva* Pr *sakhā saptapadī babhūva*
6) G om *atha*

मधु हे[1] मध्वागाहे जिह्वा मे मधुवादिनी । मुखे मे सारघं मधु दत्सु संवननं कृतम् ॥ चाक्रवाकं[2] संवननं यन्नदीभ्य उद्धाहृतम् । यद्देवगन्धर्वौ[3] वित्तस्तेन[3] संवनिनौ स्वः[4] । मां चैव पश्य सूर्यं च मान्येषु मनः[5] कृथा इति' ॥ १७ ॥

अथास्याः स्वधितिं मूर्ध्नि धारयन्हिरण्यं वोदकुम्भेनावसिञ्चत्यापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेनावसिच्य[6] यथार्थं वहत्युह्यमानामनुमन्त्रयते[7] ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनामनु[8] । पुनस्तान्यज्ञिया देवा नयन्तु यत आगता इत्यथैनां गृहानुह्यानडुहे रोहिते चर्मण्युपवेशयतीह गावो निषीदन्त्विहाश्वा इह पुरुषाः । इहो सहस्रदक्षिणोऽभि पूषा निषीदत्वित्यथैनामाग्नेयेन स्थालीपाकेन याजयत्यथैतस्य स्थालीपाकस्योपहत्याभिघार्य जुहोत्यग्नये स्वाहाग्नयेऽग्नि-

---

1) Thus N, G *ge* 2) N चक्रवाय, G *cākravā am* 3) Thus G N, Bh °*gandharvā* See HG I 24 6, Baudh G I 6 *yadıttau devagandharıau* 4) Thus G Pr, N स्वके. See HG I 24 6 5) Thus Pı, G *manamakrchā*, N मन कृथा 6) G om *nuıakenā* 7) Thus N, G °*upyamanam*°, Bh Pı °*ūhyamānām*° 8) N जनामन, G *vaśumanu* See RV X 85 31, Āp MB I 6 9

वते स्वाहाग्नये ऽन्नादाय स्वाहाग्नये स्विष्टकृते स्वाहेति[1] ' यावज्जीवमेतमग्निं व्रीहिभिर्यवैर्वा सायं प्रातः परिचरत्यग्नये स्वाहेति सायं पूर्वामाहुतिं जुहोति ' प्रजापतये स्वाहेत्युत्तरां ' सौरी पूर्वा प्रातरेके समामनन्त्यौपासनो[2] नित्यो धार्यो ' ऽनुगतो मन्थ्यः श्रोत्रियागाराद्वाहार्यो ' ऽन्यतरस्य चैतदहरुपवासः[3] ' ॥ १८ ॥

अष्टम्यः[4] पर्वाणि[5] चोपवसत्याग्नेयेन[6] स्थालीपाकेन पर्वसु यजते ' वाग्यत आस्त[7] आ[7] नक्षत्राणामुदयादुदितेषु नक्षत्रेषु वत्समन्वारभ्योत्थापयत्युदायुषा स्वायुषेत्यथैनां ध्रुवमरुन्धतीमन्यानि च नक्षत्राण्यभिवीक्षयति नमो ब्रह्मणे ध्रुवायाच्युतायास्त्वित्येतेनानुवाकेन[8] ' ध्रुवमुपतिष्ठते ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवत[9] स्थितम् । त्वं नक्षत्राणां मेथ्यसि[10] स मा पाहि पृतन्यत इति ' सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं ध्रुवतां ये ह निन्युः[11] । षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकं भ्राजत्वष्ट-

---

1) Between svāheti and yāvaj° G ins. evaṃ dhruvāhutir juhuyāt 2) Thus N, G °aupāsane 3) Thus N, G ca tad° 4) Thus G Bh, N अष्टम्या 5) Thus G N, Bh parvaṇi. Baudh. G. II 12 parvaṇi cāgnyādhāpakaḥ 6) Between °vasaty and āgneyena G ins. athaindram. See Hir I 23, 7 7) Thus N Bh, G ast 8) Thus N Bh Pr, G dhruvaity° 9) Thus MSS 10) Thus N, G meddhya, Pr medhyan 11) Thus N, G nanjuḥ

मीत्यरुन्धतीं 'त्रिरात्रमक्षारलवणाशिनावधःशायिनौ ब्रह्मचारिणौ भवतो' ऽथ चतुर्थ्यामपररात्रे[1] ऽन्तरागारे ऽग्निमुपसमाधाय जयाभ्यातानान्राष्ट्रभृत इति जुहोत्याहुतीर्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये । यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा ॥ वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये । यास्यै निन्दिता[2] तनूस्तामितो नाशयामसि स्वाहेति' ॥ १९ ॥

अथैनां तूष्णीं हिंकृत्य वाग्यत उपेत्यामूहमस्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहमृक्तं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेत्यथास्या अपवृत्तार्थो ऽपवृत्तार्थायै[3] मुखेन मुखं संनिधाय प्राणित्येतं[4] प्राणमपानिहीति' तं सा प्रत्यपानित्यथास्या आचान्तोदकायै[5] पाणी प्रक्षाल्याभिमृशति करद्धयच्छिवेन त्वा पञ्चशाखेन हस्तेनाविद्धिपावता सा-

---

1) Thus N, G *caturthām°*, Pr *°pararātrau*, Bh *apararātre*

2) Thus N Bh Pr; G *nimnditā* 3) G *pravṛttārthāyām*, N प्रवृतार्थाये; Bh *apavṛttārthāyā* 4) G *pranipatyai°*, N प्रपित्ये° 5) Thus G N, Bh *°odakāyāḥ*

हस्तेन[1] यशस्विनाभिमृशामि सुप्रजास्त्वायेति भसदेशं ' यदा मलवद्वासा स्याद्थैनां ब्राह्मणप्रतिषिद्धानि व्रतानि संशास्ति यां मलवद्वाससमिति ' चतुर्थ्यां[2] स्नातां प्रयतवस्त्रां ब्राह्मणसंभाषां[3] सं ते मनसा मन इत्येतेनानुवाकेनोपसंविशति ' सर्वाण्युपायनानि मन्त्रवन्ति भवन्तीत्याश्मरथ्यो ' यथादौ यथर्तावित्यालेखनः ' ॥ २० ॥

अथास्याः प्रथमगर्भिण्याश्चतुर्थे मासि सीमन्तं कुर्वन्त्यापूर्यमाणपक्षे पुष्ये नक्षत्रे पयसि स्थालीपाकं श्रपयित्वोत्तरागारेऽग्निमुपसमाधाय जयाभ्यातानान्राष्ट्रभृत इति हुत्वैता आहुतीर्जुहोति भूर्भुवः सुवः प्रजापत[4] इति[4] चतस्रस्त्र्येण्या शलल्या त्रीणि[5] दर्भपुञ्जीलानि[5] शलालुग्लप्समित्युपनियम्योर्ध्वं[6] सीमन्तमुन्नयति भूर्भुवः सुवो राकामहं यास्ते राके ॥ सोम एव नो राजेत्याहुर्ब्राह्मणीः[7] प्रजाः । विवृत्तचक्रा आसीनास्तीरेण यमुने तवेति तीरेणासौ तवेति वा यस्यास्तीरे वसति ' पुरस्तादग्नेरेतानि निधाय त्रीनोदनानुद्धृत्य सर्पिषोपसिच्योपनिदध्यात्युदशरावं चतुर्थ ' तेषामेकैकमवेक्षमाणां[8] पृच्छति

1) Thus Pr, G N sahasrena
2) Thus N G caturthām
3) Thus G, N ब्राह्मणभाषा°
4) Thus N Bh G prajāpatim
5) Thus G, N त्रिर्दर्भपुञ्जीलैः
6) Thus G Bh N °यनियम्य°
7) G N om the visarga
8) Thus Bh Pr G °māṇā, N °माणां

किं पश्यसीति ' पुत्रांश्च पशूंश्चेति प्रत्याह [1] ' तेषामेकं ब्राह्मणान्भोजयेदेकं [2] ब्राह्मणीरेकं [3] सह कुमारैः सा प्राश्नाति ' वाग्यत आस्त आ नक्षत्राणामुदयाद्दित्तिषु नक्षत्रेष्विति समानम् ' ॥ २१ ॥

अथ पुंसवनं तृतीये मासि चतुर्थादौ वा तिष्येण वा हस्तेन वानुराधैर्वोत्तरैर्वा प्रोष्ठपदैर्न्यग्रोधावरोधमाहृत्यानवस्नातया कुमार्या दृषत्पुत्रे [4] दृषत्पुत्रेण [4] पेषयित्वा-न्तरागारे ऽग्निमुपसमाधाय जयाभ्यातानाराष्ट्रभृत इति हुत्वेता [5] आहुतीर्जुहोति [5] यस्त्वा हृदा किरिणेति चतस्रो' ऽपरेणाग्निं प्राचीमुत्तानां [6] निपात्याथास्या दक्षिणे नासिकाछिद्रे ऽङ्गुष्ठेनानुनयति पुंसवनमस्यमुष्या इति ' सा हेत्याह ' पुमांसमेव जनयत्यथ क्षिप्रंसुवनं ' यज्ञोपवीतं कृत्वाप आचम्यानाप्रीतेन शरावेणानुस्रोतसमुदकमाहृत्य पत्तस्तूर्यन्तीं निधाय मूर्धञ्क्षोष्यन्तीमभिमृशति [7] ' दशभिस्त्वाङ्गुलिभिरभिमृशामि [8] दशमास्याय सूतवा [9] इत्येयैनामद्भिरवोक्षति यथेव वातः पवते यथा समुद्र एजति ।

1) Thus N, G *pratyāyāma* 2) Thus G N Bh, Pr *brāhmaṇam°* 3) Thus G Bh, N ब्राह्मणीं चेक, Pr *brāhmaṇīm ekam* 4) Thus Pr, G Bh *dṛṣatpu°* N उदयपु° 5) G *hutvāhutīr°* 6) Thus N Bh, G *prācīnam°* 7) Thus N Bh, Pr *koṣyantīm*, G *°joṣyantīm°* See Āp G 14 14 8) G Bh *daśabhyāṃgulibhir°* N Pr *daśabhisvāṃgulibhir°* 9) Thus N, G Pr *sūtava*

एवं कुमार एजतु सह जरायुणावपद्यतामित्यंथ यद्यपरा[1] न[1] पतेत्पाणिनोदकमादाय[1] मूर्धन्येनामवसिञ्चेत्तिलदे ऽवपद्यस्व न मांसमसि नो दलमवपद्यस्वासाविति[2]' यदि[3] गर्भः स्रंसेदार्द्रेण पाणिना त्रिरूर्ध्वं नाभेरुन्मृजेत्प-राञ्चं[4] त्वा नार्वाञ्चं[5] त्वष्टा बध्नातु बन्धनैः । स ऋतूनु-पशेष्व[6] दशमासो ऽवीरहेति' ॥ २२ ॥

विजातायाः[7] परिदां करोति' दक्षिणार्धे ऽगारस्या-ग्निमुपसमाधाय सर्षपान्फलीकरणमिश्रानञ्जलावप्युष्य जु-होति शण्डो[8] मर्क उपवीरस्तुण्डिकेर उलूखलः । च्यवनो नश्यतादितः स्वाहेत्येवं द्वितीयामेवं तृतीयाम-थापरां केशिनी[9] श्वलोमिनी खजाप्रोजोपकाशिनी[10] । अपेत नश्यतादितः स्वाहेत्येवं द्वितीयामेवं तृतीयामथा-परामर्यम्णः[9] कुम्भीपात्रः[11] पात्रपाणिर्निपुणिः[12] । अपेत[13] नश्यतादितः स्वाहेत्येवं[14] द्वितीयामेवं तृती-

1) Thus Bh, G *yadjapamānatat°*, N °पारोत्पा° 2 Thus MSS, read perhaps with Baudh G VII 2 *avapadyasva nastyā iti* 3) G om 4) Thus Bh Pr, G N *parā ica* 5) G *narvāñca*, N र्वाञ्च, Bh Pr *narvāñcam* 6) Thus Pr, G °*upaniśeṣva*, N °उपशे-- 7) Thus N Bh, G *ni°* 8) See HG II 3 7 PG I 16 23, Ap. MB II 13 8 9) G om from *keśinī* unto *aryamṇaḥ* 10) N खजाप्रोजाप°, Pr *khajāpolopa°* 11) Thus G Bh Pr N कुम्भी ताद्री पात्र 12) Thus N Pr, G *pāṇinipuṇiḥ* 13) Thus G Pr N पेत 14) G om from *ityevaṃ* unto *muraradsasaḥ*

यामंथापरां[1] मिश्रवाससः कौवेरका रक्षोराजेन प्रेषिताः। ग्रामं सज्ञानयो[2] गच्छन्तीच्छन्तो ऽपरिदाकृतान्स्वाहा ॥ एतान्घ्नतैतान्गृह्णीतेत्ययं[3] ब्राह्मणो दूतः। तानग्निः पर्यसरत्तानिन्द्रस्तान्बृहस्पतिः। तानहं[4] वेद ब्राह्मणः प्रमृशतः कूटदन्तान्विकेशान्लम्बनस्तनान्स्वाहा[5] ॥ नक्तंचारिण[6] उरस्पेशाञ्छूलहस्तान्कपालपान्[7]। पूर्व[8] एषां पितेत्युच्चैः[9] श्राव्यकर्णकः। माता जघन्या सर्पति ग्रामे विधुरमिच्छन्ती[10] स्वाहा ॥ प्रदोषचारिणी[11] स्वसा संधिना प्रेक्षते कुलम्। या स्वपन्तं बोधयति यस्यै विजातायां मनः[12]। तासां त्वं कृष्णवर्त्मने क्लोमानं हृदयं यकृत्। अग्ने अक्षीणि निर्दह स्वाहेत्येवमेव निष्क्रामति च प्रपद्यमाने चावपताद्दशरात्रा निर्दशतायां[13] इति' ॥ २३ ॥

सा[14] यदि पुमांसं जनयति तमभिमृशति वृधदिति[15]' मध्यमं पलाशपलाशं संवेष्ट्य तेनास्य दक्षिणं कर्णमाजपति

1) G om from *ityetam* unto *miśravāsasaḥ* 2) Thus G, N सज्ञातयो
3) Thus N Pr, G °*ghnatayitān*° 4) Thus N, G °*aha* 5) G °*vikeśallambana*°, N °विग्रेशालम्बा° 6) Thus N Bh, G *naktan*°
7) Thus N, G °*ñchīlya*° 8) Thus N, G *parva* 9) Thus G, N पितु° 10) Thus G, N विधुरमि° 11) Thus G Bh, N °धारिणी
12) Thus N, G *enaḥ* 13) Thus G Bh, N निर्दश°; Pr *nirdaśa*°
14) Thus N Pr, G *vasā* 15) Thus Pr, G *vṛthad*°, N वृध्यादि°

भूस्त्वयि दधामीति ' भुवस्त्वयि दधामीत्युत्तरं ' सुवस्त्वयि दधामीति दक्षिणामपि वोत्तरमेव द्विः सकृदेव दक्षिणमन्वेनमभिमन्त्रयते ऽश्मा भव परशुर्भव हिरण्यमस्तृतं भव। वेदो वै पुत्रनामासि स जीव शरदः शतम् ॥ मेधां ते देवः सविता मेधां देवी सरस्वती। मेधां ते अश्विनावुभावाधत्तां पुष्करस्रजौ। वेदो वै पुत्रनामासि स जीव शरदः शतमित्यथैनं दधि मधु घृतमिति संसृज्य त्रिभिर्दर्भपुञ्जीलैर्हिरण्येन वा त्रिः प्राशयत्यपां[1] त्वौषधीनां रसं प्राशयाम्यायुर्वर्चो यशो मेधां त्वयि दधामि सवित्रा प्रसूतस्त्वष्टा वीरमधात्स मे शतायुरेधि[2] भूर्भुवः सुवरित्यथास्य दक्षिणेन हस्तेन दक्षिणं हस्तमभीवाङ्गुष्ठमभीव लोमानि गृह्णात्यभिरायुष्मानित्येतैर्मन्त्रैर्नवनीतेन पाणी अभ्यज्य[3] हिरण्यं हस्ते कृत्वा ॥ २४ ॥

अग्नौ प्रताप्याभिमृशत्यग्नेस्त्वा[4] तेजसा सूर्यस्य[5] वर्चसेन्द्रस्येन्द्रियेण विश्वेषां त्वा देवानां क्रतुनाभिमृशामि ॥ अङ्गादङ्गात्संभवसि हृदयादधि जायसे[6]। आत्मा वै पुत्रना-

1) Thus Pr, G N *praśayanty°*
2) Thus N Pr, G *°edhi*
3) Thus Pr, G *abhyaracya* N अभिमृश्य
4) Thus Pr, G *°agnestvā*, N °ग्नेष्ट्वा
5) Thus N Pr, G *sūryya*
6) Thus N, G *athajāyate*

मासि स जीव शरदः शतमित्यथैनं[1] वात्सप्रेणाभिमृशति दिवस्परीत्यनुवाकेन ' यत्र शेते तदभिमृशति वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् । वेदामृतस्य[2] गोतारं मार्हं[2] पौत्रमघं रुदमित्यथैनं मातुरुपस्थ आदधाति मा ते पुत्रं[3] रक्षो वधीन्मा[4] धेनुरत्यासारिणी । प्रिया धनस्य भूया एधमाना[5] स्वे वश इति ' स्तनं प्रतिधापयत्ययं कुमारो जरां धयतु दीर्घमायुः । तस्मै त्वं स्तन[6] प्रप्यायायुर्वर्चो[6] यशो बलमिति ' संविष्टाभ्यां परिदां करोति नामयति न रुदति यत्र वयं वदामसि यत्र चाभिमृशामसीति ' शिरस्त उदकुम्भं निदधात्यापः सुप्तेषु जाग्रत रक्षांसि निरितो[7] नुदध्वमिति ' नैतासामपामुदकार्यं कुर्वन्त्यथ यदि चिरं[8] न विज्ञायते[9] स्तनमेनां दर्शयेत्यरिमुत्तायां क्षिप्रमेवोपनिर्हरेय्यदा[10] यदा सूतिकारोगः[11]

---

1) After °तिम N ins. गोभर्ग--- धिद्ययमन्तर्धयात्र --- मेधां ते देव, सविता मेधा देवी सरस्वती मेधां ते अश्विना उभावाधत्त पुष्करस्रजौ । वेदो वै पुत्रनामासि स जीव शरदः शतमिति

2) G *vadāhasya gopāmaham*, N वेदामृतस्य गोप्तारं, Pr *vedāmṛtasya gopāham* See SMB I 5 11 *vedāmṛtasyāham nāma*

3) Thus N Pr, G *pumim* 4) Thus Pr, G *rawan*°, N हिंसी°

5) Thus N, G *ye*° 6) Thus G, N स्तन प्रप्याय°; see Āp. MB II 13 2 HG II 4 3 7) G *nirrlo*, N निरितो 8) G *cinan*, N --

9) Thus G N विज्ञायेत 10) Thus N Bh, G *kṣipramevānuharet yad*°

11) G *sūtikarogasyadadakṣi*°, N सूतकारोगस्य इति°, Bh *sūtikāroge syāt*; Pr *sūtakāroga syāt*

स्याद्व्रिणस्य[1] पदस्तासोदकेन पाणिं क्लेदयित्वा तदा त तं[2] देशमवमार्ष्टि यत्रास्या दुःखं भवति धनुर्मटची पुरुषस्य हस्तयोरिकशतं[4] शृणोरङ्ग[5] ते धापयितारस्वं रोगस्येशिषे त्वमु रोगस्य[7] सूतिकारोगभिपद्यमस्यमुष्या इति ' ॥ २५ ॥

~ उपनिर्हरन्ति सूतिकाग्निमौपासनमतिहरन्ति ' स ए उत्तपनार्थो भवति ' नास्मिन्किं चन कर्म क्रियते ' दशम्य स्नातौ मातापुत्रौ ' शुच्यगारं कुर्वन्त्युपनिर्हरन्त्यौपास सूतिकाग्निमतिहरन्त्यंतरागारे[9] अग्निमुपसमाधाय जयाभ्या तानाभ्राङ्गभृत इति हुत्वैता आहुतीर्जुहोति धाता ददा नो रयिमित्यष्टौ ' दशम्यां पुत्रस्य नाम दधाति घक्षरं[10] चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं ' तदि प्रतिष्ठितमिति विज्ञायते ' पिता मातेत्यग्रे[11] अभिव्याहरे याता[12] ' विज्ञायते मम नाम प्रथमं जातवेदः पिता मात च दधतुर्यदग्र इति ' द्वे[13] नामनी[13] कुर्याद्विज्ञायते न

---

1) Zie noot 11, pag 26 2) From *tam* unto *yatrāsyā* G ver corrupt. 3) G *madajī*, N corr , Bh *manthaji*, Pr *mādaci* 4) Thu N Pr, G *°claram* 5) Thus Pr, G *grenor'*, N corr 6) Thus [illegible] Pr, G [illegible] 7) Thus N Pr, G [illegible] 8) Thus G Bh, Pr [illegible]
9) G *autakāgnim°*, N सूतकाग्नि°; Bh *sūtāgnim°* 10) Thus N, G *dvakṣuram* 11) Thus N, G *pitā mātyagre*, Bh *pitā mātā cāgre*
12) Thus Bh, G *bhivyāharetām*, N भिव्याहरेयातां 13) Thus N Bh, G *renāma*

तस्माद्द्विनामा ब्राह्मणोऽर्धुक इति ' नक्षत्रनाम द्वितीयं स्यादन्यतरद्गुह्यं[1] स्यादन्यतरेणैनमामन्त्रयेरन्[2] ' ॥ २६ ॥

विप्रोष्य हरिणी दूर्वे आदाय गृहानुपोदेति गृहा मा बिभीत मा वेपिढ्वमूर्ज बिभ्रत एमसि । ऊर्ज बिभ्रद्वः[3] सुमनाः सुवर्चा[4] गृहानैमि मनसा मोदमानः ॥ येषां[5] प्रवसन्नध्येति[6] येषु सौमनसो[7] बहुः[8] । गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ इमे गृहाः प्रति जीवेष्वस्युरूर्ज बिभ्रतो जगतः सुशेवाः । एह[9] वत्सः[10] क्रन्दत्वा[11] कुमार आ धेनवो बहुला नित्यवत्साः ॥ उपहूतं गोअश्वमुपहूता अजावयः[12] । अथो अन्नस्य कीलाल उपहूतो गृहेषु मे ॥ ऊर्ज बिभ्रत एमस्यूर्जा वः संसृजामि रमध्वं मा बिभीतनेति[13] ' तृणे प्रास्यति ' शिवा उपमितः प्रमितश्च सन्त्विति[14] द्वार्ये संमृशति ' क्षेमाय वः शिवः शान्त्यै प्रपद्य इति प्रपद्यते[15] दक्षिणपूर्वा-

---

1) Thus Bh, G om *anyataradguhyam*, N अन्यतार गुह्य . 2) Thus N, G °*amantrayit*, Bh °*āmantrayīran* 3) G om the visarga 4) G *suvarccah* |, N सुमेधा 5) Thus N, G *eṣīm* 6) G *pavasannarddhyemi*, N प्रसन्न्येति 7) Thus N, G *saumanasaumanasau* 8) G *babhuh*, N बहु 9) G Bh Pr *ehi*, N इति 10) Thus N Pr, G Bh om the visarga 11) Thus G, N क्र दत्वा, Pr *kandatvā* 12) Thus N Pr, G *ajivayah* 13) G *babhiteti*, Pr *bhītaneti*; N corr, see AV VII 60 1, Kauś. 89 12. 14) Thus N Bh Pr, G *santiti* 15) Thus N, G om

ध्यामनुवीक्षते[1] ऽभयं वो[2] ऽस्त्वभयं[2] मे अस्त्विति'
भार्यां संगच्छमानामनुमन्त्रयते विश्वा उत त्वया वयमि-
त्येतया' पुत्रं संगच्छमानमनुमन्त्रयते ऽङ्गादङ्गात्संभवसीति
द्वाभ्यामथैनं मूर्धन्यवजिघ्रत्यशूनां त्वा हिंकारेणाभिजि-
घ्रामि प्रजापतये[3] त्वा[3] हिंकारेणाभिजिघ्रामि[3] प्रजाप-
तिस्त आयुर्दधातु स मे शतायुरेधि भूर्भुवः सुवरिति'
सर्वेभ्यः प्राणेभ्यो जातासि सा जीव शरदः शतमिति
द्वित्तुरथैनं पठे मास्यन्नं प्राशयति' तस्य स एव प्रा-
शनकल्पो यो[4] मेधाजनन[4] एतावन्नाना[4] भूरित्यग्रे
प्राशयति भुव इति द्वितीयं सुवरिति तृतीयम्' ॥ २७ ॥

अथास्य सांवत्सरिकस्य चौडं कुर्वन्ति यथर्षि यथोपज्ञं
वा[5] 'विज्ञायते च[5] यत्र बाणाः संपतन्ति कुमारा वि-
शिखा इवेति बहुशिखा इवेत्यर्थान्नं[6] संस्कृत्य ब्राह्म-
णान्भोजयित्वाशिषो वाचयित्वान्तरागारे ऽग्निमुपसमाधाय
जयाभ्यातानांराष्ट्रभृत इति हुत्वैता आहुतीर्जुहोति पूर्णा
पश्चादिमं[7] मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो
अग्ने त्वमग्ने अयास्यनभिशस्तीश्च यदस्य कर्मणो ऽत्यरीरिचं

---

1) Thus N Bh, G *anuvīkṣateta* Pr *anuvīkṣeta* 2) N सोभयम्, Bh *vobhayam*, Pr *vo abhayam* G om 3) N om 4) Thus Bh, G om *yo* and *etāvannānā*, N om यो मेधाजनन 5) G om 6) Thus N, G *°arthānnam* 7) G om from *imam* unto *gurave*

प्रजापत इत्युत्तमां हुत्वा गुरवे वरं ददात्यपरेणाग्निं गोमयपिण्डं सर्वबीजानीत्युपनियम्य सर्वबीजानामग्रं गोमयपिण्डे न्युप्य शीतोष्णा[1] अपः[1] समानीय[2] ताभिरस्य दक्षिणं गोदानमुनत्त्याप[3] उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इति 'त्रेण्या शलल्या विनीय त्रीणि दर्भपुञ्जीलान्यूर्ध्वाग्राण्युपनियच्छत्योषधे[4] त्रायस्वैनं स्वधिते मैनं हिंसीरिति लोहितायसं क्षुरं तिर्यञ्चं निधाय[5] प्रवपति यदृषीणां त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥ येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषे ऽवपत्तेन ते वपाम्यसौ दीर्घायुत्वाय वर्चस इत्येवमेवोत्तरं गोदानं वापयते 'केशान्वापयित्वा गोमयपिण्डे निदधात्यथैनं गोमयपिण्डं गोष्ठ उदकान्त उदुम्बरमूले दर्भस्तम्बे वा निदधात्यथैनं स्नातमलंकुर्वन्ति' ॥ २८ ॥

इति भारद्वाजसूत्रे प्रथमः प्रश्नः ॥

अथवाकर्म व्याख्यास्यामः 'श्रावण्यां पौर्णमास्यामुपकल्पयते ऽक्षतधानाश्चाक्षतसक्तूंश्च[6] जात्यं चाञ्जनमंस्तामित

---

1) N शीतोष्णा आप , G Bh śītoṣṇāpas   2) Thus G Pr, N समानाय
3) G Bh Pr °unakty°, N °मुत्त्या°   4) Thus G, N °प्युपनिधाय चोत्रधे
5) Thus N Pr, G om   6) Thus N, G °dhānāścakṣatasaṃjñaṃśca, Bh dhānāścakṣatantyajnamsca

आदत्य ऽत्तरागारे ऽग्निमुपसमाधाय ऽयाम्यातानात्राष्ट्रभृत इति कृत्वाक्षतधानानां[1] चाक्षतसक्तूनां[1] च समवदाया-भिघार्य जुहोत्यग्नये पाण्डराय पार्थिवानामधिपतये स्वाहेति प्रथमामाहुतिं जुहोति 'श्वेताय वायव्यायान्तरि-क्षाणामधिपतये स्वाहेति द्वितीयामंभिभुवे सूर्याय दिव्या-नामधिपतये स्वाहेति तृतीयामुपनिष्क्रम्य स्थण्डिल[2] एवैता आहुतीर्जुहोत्यपि वा समीची नामासि प्राची[3] दिगिति[3] सर्पाहुतीः[4] 'प्राशनार्था[5] धाना उपकल्प्या-क्षतधानाश्चाक्षतसक्तूंश्च[6] आज्यं चाञ्जनं स्थण्डिले न्युप्या-भिमन्त्रयते नमो अस्तु सर्पेभ्य इति तिसृभिस्ततो यावन्तं देशं कामयत[7] इमं[7] सर्पा नागच्छेयुरिति तं संततयो-दधारयानुपरिषिञ्चत्यप[8] श्वेत पदा जहि पूर्वेण चापरेण च । सप्त च मानवीरिमास्तिस्रश्च राजबन्धवैः[9] ॥ न वै श्वेतस्याध्याचारे[10] ऽहिर्ददंश कां[11] चन । श्वेताय वैद-

---

1) Thus N, G °*dhānāncakṣatasamjñān* 2) G N Bh *sthandilam*, but see introd 3) G *prācidagiti*, N प्राचीरिति See TS V 5 10 1 4) Thus Bh, G *sarpā āhutih*, N सर्पति 5) G *prāśanārtthan*, N प्राशनाथा, Bh *prāśadhanārttha* 6) G *utkalpyākṣatadhāścakṣatasamjñāśca*, N very corr, Bh *upakalpya* 7) G B *kāmayate imam*, N कामयेमु 8) G *santatodadhārayā°*, N °धारयापरिषिच° 9) G *rājabandhavaih*, N राजबन्धवै, see HG II 16 8 10) G °*ārddhamaddhyācāre*, N °ध्याचारे 11) Thus G N, see, however, HG II 10. 8, PG II 14 5.

र्व्याय नम इति ' तत एता धाना असमेत्यावगिरन्ति यावन्तो हविरुच्छिष्टाशा भवन्ति ' तत एतांश्चतुरो[1] मासान्सर्पेभ्यो बलिं हरन्ति ' सक्तून्त्वेवमर्थान्कुर्वन्त्यपि वा यद्यदन्नं क्रियते तस्य तस्य ' ॥ १ ॥

तत आग्रहायण्यां पौर्णमास्यामेवमेवैतत्कर्म क्रियते ' यदन्यद्धानाप्राशनात्परिषेचनादिति सर्वं तत्क्रियत ' आग्नेयेन स्थालीपाकेन पर्वसु यजते ' तस्य पुरस्तात्स्विष्टकृत एता आहुतीर्जुहोतीडायाः पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व । ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानामिह रन्तिरस्तु पुष्ट्यै स्वाहा ॥ यां देवाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ॥ पौर्णमासी[2] पूरयन्त्यायात्यपरापरम्[3] । अर्धमासान्विभजन्ती सा नः पूर्णाभिरक्षतु स्वाहा ॥ शिवा पशुभ्यो[4] दारेभ्यः शिवा नक्तं शिवा दिवा । संवत्सरं[5] कल्पयन्ती सा नः कामदुघा भवत्स्वाहा[6] ॥ पूर्णा पश्चादुत्तमाग्ने अयासि प्रजापत इति तिस्रस्ततः[7] सौविष्टकृतं जुहोत्यग्नये स्विष्टकृते स्वाहेत्यथ

---

1) Thus Bh, G N एताश्चतुरो 2) Thus Bh, G *pūrnamāsī*, N पौर्णमासीं 3) G *pūrayuntyā ety°*, N Bh *pūrayantyāyety°* 4) Thus N Bh, G *patibhyo* 5) G *catsara*, N सजत्सरस्य 6) Thus G, N भव स्वाहा 7) G om *tatah*, N ततस तत

हेमन्तप्रत्यवरोहणं ' यत्र प्रत्यवरोहन्भवति[1] तदुपतिष्ठते[2] प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे[3] प्रत्यश्वेषु प्रति तिष्ठामि गोषु । प्रति प्रजायां प्रति तिष्ठामि भव्ये[4] ॥ स्योना पृथिवि नो[5] भवानृक्षरा निवेशनी[6] । यच्छा नः[7] शर्म सप्रथा इति ' ॥ २ ॥

शालाकर्म व्याख्यास्यामः ' शालां कारयिष्यमाण[8] आपूर्यमाणपक्षे पुण्ये नक्षत्रे ब्राह्मणानन्नेन परिविष्य परिलिख्येहैव[9] ध्रुवां[9] निमिनोमि[9] शालां क्षेमे तिष्ठतु घृतमुक्षमाणा । तां त्वा[10] शाले[10] सर्ववीराः सुवीरा अरिष्टवीरा अनुसंचरेमेति दक्षिणां द्वारस्थूणामुच्छ्रयतीहैव ध्रुवा[11] प्रतितिष्ठ शाले अश्ववती गोमती[11] सूनृतावती । ऊर्जस्वती पयस्वती घृतवत्युच्छ्रयस्व[12] महते सौभगायेत्युत्तरामां[13] त्वा कुमारस्तरुण आ वत्सो जगता[14] संह । आ त्वा परिस्रुतः[15] कुम्भ आ दध्नः कल-

1) Thus G, N प्रत्यवरोहा न भवति; Bh *pratyavarohayuyan bhavati*
2) G Bh °*upadusthate*, N °पतिष्ठिते 3) Thus N Bh, G *rașțe*
4) G *bharyo*, N दृव्ये 5) G om 6) G *nivekaśani*, N निवेशिनी
7) G om the visarga 8) Thus Bh, G *kārtyamāna*, N कारयिष्यमाण
9) G *parilikhya ihaivāminomi*, N परिलिख्य ध्रुवा निमिनोमि 10) Thus N, G *cāśāle* 11) G om 12) G om *ghrtavaty*, N घृतवत्य; but see AV III 12. 2. 13) Thus N, G °*uttarenamā* 14) Thus N, G *gajagatā* 15) G N *parisrtah*, see MG II. 11 12, AG II 8. 16, PG III 4 4 Āp MB II 15. 4

शीरयन्निति[1] संमिते[2] अभिमृशत्येवमेव स्थूणाराजावुच्छ्रयत्येवमभिमृशत्येतेन[3] स्थूणावधिरोह वंशोग्रो[4] विराजन्नपसेध[5] शत्रून् । अथास्मभ्यं सर्ववीरां रयिं दा इति पृष्ठवंशमधिरोपयति ' मानस्य[6] पत्नि[6] शरणा[6] स्योना देवेभिर्विमितास्यग्रे । तृणं वसाना[7] सुमना[7] असस्त्वं[8] शं न[9] एधि[9] द्विपदे शं चतुष्पद[10] इति[10] छन्नामभिमृशति[11] ' ॥ ३ ॥

अगारप्रवेशं[12] व्याख्यास्याम ' आपूर्यमाणपक्षे[13] पुण्ये नक्षत्रे ऽन्तरागारे ऽग्निमुपसमाधाय जयाभ्यातानाराष्ट्रभृत इति हुत्वैता आहुतीर्जुहोति वास्तोष्पत इति द्वे ' वास्तोष्पते प्रतरणो न[9] एधि[9] गयस्फानो[14] गोभिरश्वेभिरिन्दो[15] । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व स्वाहा ॥ परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् । वास्तोष्पते शृण्वते ते ब्रवीमि

1) G *kalariyannıtı*, N कलशोरियमिति 2) Thus N, G *sajyate* 3) Thus Bh, G N °*etena* 4) Thus G, N वशोर्धो. See HG I 27. 7, Āp MB II 15 5 5) Thus N, G °*apasetha* 6) Thus AV III 12. 5, G *mānasvapatnaśśaraṇārthe*, N मा न सपत्न शरणा, Bh *mānassapatlaśśareṇā* 7) Thus N, G *ıasanāssuno* 8) G *adhastıam*, N यस, see AV III 12. 5 9) G *nayedhı* 10) Thus emended G N *catuṣpade* 11) G *chśantābhi*°, N उच्छ्रामभि° 12) G *akāra*° 13) G om from *mānapakṣe* unto *āhutir*° I 10 14) Thus N, G *gayasthāno* 15) G N °*ındro*, see RV VII 54 2, HG I 28 1 etc.

मा नः प्रजां रीरिषो मोत[1] विराजस्वाहेति ' भूमिमभिमृशति प्रति क्षत्रे प्रति तिष्ठामि राष्ट्र इति द्वाभ्यामिदं श्रेयो ऽवसानं[2] यदागां स्योनं[3] मे द्यावापृथिवी अभूताम् । अनमीवाः प्रदिशः सन्तु मह्यं गोमद्धनवदश्ववदूर्जस्वत्सुवीरवदिति[4] चैतयाहतं वास आच्छाद्य तद्वास्तु परिमापयेदहतं[5] वृणीष्व मावार्य[6] मा नो हिंसीः कदाचन ॥ स्योना पृथिवि भवानृक्षरा निवेशनी[7] । यच्छा नः शर्म सप्रथा इत्युदायुषा स्वायुषेत्युपोत्थायोपसमूह्य ब्राह्मणानन्नेन परिवेषयेत् ' ॥ ४ ॥

तत्पूर्वं वास्तुशमनमंथान्यच्छरणे कृत उदुम्बरपलाशानि[8] सतुषिराणि[9] यवैः सह गोमयं शाद्वलं[10] रासभं[11] मधु चैवात्र[12] सततं तैरगारं वास्तु च परिप्रोक्षेत्पूर्ण उदधिर्भवति प्रज्वलितो[13] ऽग्निर्भवति[13] ' ब्राह्मणमग्रे प्रवेशयति[14] ' ब्राह्मणमाह प्रविशानीति ' प्रवि-

1) Thus N, G om. *mo* 2) Thus N, G *vasanam* 3) Thus N, G *syona* 4) G °*jasva asuvirāditi*, N °स्वजसुवीरवदिति 5) Thus Bh; G °*ri ta*, N °हृत 6) G *mamabiryya*, मावार्य, Bh *mā ca* 7) Thus G, N निवेशिनी 8) Thus N Bh, G *audumbara*° 9) Thus G Bh, N सषिराणि 10) Thus G B, N --घन 11) Thus G, N रासरं; Bh *rasabham* 12) Thus G Bh, N चैव तु 13) Thus G Bh, N प्रज्वलिताग्नि° 14) Thus Bh, G *pravesati*, N om.

शतु भवानायुषा[1] वर्चसा[2] श्रियावृत[3] इति ब्राह्मणानुमतः प्रविशति भूः प्रपद्ये भुवः प्रपद्ये श्रियं प्रपद्ये श्रीर्मा प्रविशत्विति[4] ' ब्राह्मणमनु[5] प्रविश्य जयाभ्यातानान्राष्ट्रभृत इति हुत्वाग्निं देवानां महयत्यग्निर्देवानामधिपतिः पुरीष्यो[6] हव्यवाहनः[7]। तं त्वेमि[8] शरणं देव सपुत्रः[9] सह ज्ञातिभिः स्वाहा ॥ सदासभार्यः सामात्यः सायामग्नये स्वाहेत्यग्निं महयित्वाथ राजानमीडते[10] त्वद्दत्तं वै बलं राज्ञे त्वन्मूर्तमिह[11] जीवते। हिरण्यवर्ण हर्यक्ष अर्थं मह्यं साधय स्वाहा ॥ कुबेराय[12] स्वाहा[12] महाराजाय स्वाहा वैश्रवणाय स्वाहेति ' राजानं महयित्वाथेन्द्रं देवानां महयति त्रातारमिन्द्रमिन्द्रं विश्वा अवीवृधन्नितीन्द्रं महयित्वा विश्वान्देवान्महयति विश्वे देवा विश्वे[13] देवा[13] इति द्वाभ्यां[12] ' विश्वान्देवान्महयित्वा ॥ ५ ॥

अथ पञ्चेध्मानभ्याधाय[14] जुहोति मेधां मनसि जुहोमि स्वाहा ॥ मनो मेधायां जुहोमि स्वाहा ॥ श्रद्धां तपसि

---

1) Thus N, G *°āyuṣmān*, N ins तेजसा 2) N ins यशसा 3) Thus G, N श्रिया वृत 4) G *viśatviti*, N प्रविशतीति 5) G *brāhmaṇānumataḥ*, N ब्राह्मणानु 6) Thus emended, G *puñjuṣṭho*, N पुरिष्ठो 7) Thus N, G *hajanah* 8) Thus emended, G *tannaumi*, N त चेमि 9) G *svaputras*, N सूपुत्रा 10) Thus N Bh, G *rājadhānīm°* 11) Thus N, G *tvaddattam°* 12) G om 13) N om 14) Thus Bh, G *pañcorddhān°*, N पञ्चेध्मान°

जुहोमि स्वाहा ॥ तपः श्रद्धायां जुहोमि स्वाहा ॥ मृत्योर्मुखं विदधामि स्वाहा ॥ ये देवाः पुरःसदो ऽग्निनेत्रा[1] रक्षोहणास्ते नः पान्तु ते नो ऽवन्तु तेभ्यो[2] नमस्तेभ्यः स्वाहा[3] ॥ शान्तमिदमवसानं[4] प्रपद्ये[5] स्वाहा ॥ ये देवा दक्षिणसदो[6] ये देवाः पश्चात्सदो ये देवा उत्तरसदो ये देवा उपरिषदो बृहस्पतिनेत्रा रक्षोहणास्ते[7] नः पान्तु ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा[8] ॥ शान्तमिदमवसानं प्रपद्ये स्वाहा ॥ पूर्णा पश्चादिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स[8] त्वं[8] नो[8] अग्ने[8] त्वमग्ने अयास्ययाश्चाग्ने ऽस्यनभिशस्तीश्च यदस्य कर्मणो ऽत्यरीरिचं प्रजापत इत्युत्तमां हुत्वा ब्राह्मणानन्नेन परिवेषयेद्धांस्तु गर्हितं यत्र वान्यः[9] परिभवेत्तत्रापि सुखमासीत् शमयन्वास्त्वृतावृतावेतद्धौम्यस्य[10] वचनमसितस्य तुरङ्गस्य च मुनेः काव्यस्य दाल्भ्यस्य 'नैतद्विद्वान्पराभवेत्[11]' ॥ ६ ॥

---

1) Thus N Bh, G *gnenetri* 2) Thus N, G तेनो 3) G N om, see TS I 8 7 1, 2 4) Thus N, G *śāntim°* 5) Thus N, G Bh *pratipadye* 6) G ins. *yamanetrā* 7) G om from *rakṣohanas°* unto *uttamām* l 11 8) N om 9) Thus N Bh, G *cānnyah* 10) G *°vāstu nastvatavutātāvetachśaumya*, N शमयन्वा स्मृतावेत°, Bh *ertāvrtau etaddhaumyasya* 11) N *°vidvānna°*, if we insert ऽभवेत् after गर्हितं (l 12) and cancel च (l 14), the last passage is metrical (śloka)

अग्रदूप्रायश्चित्तं ' श्चोपस्पृष्टे[1] तथज्ञोपवीतं कृत्वाप आचम्यानाप्रीतेन शरावेणानुस्रोतसमुदकमाहृत्याथ सभायां[2] मध्ये ऽधिदेवनमुद्धत्यावोक्ष्याक्षान्युप्याक्षेषु हिरण्यं निधायोपरिष्टात्सभायां व्यूह्य तृणानि तेन कुमारमन्ववहृत्याक्षेषूत्तानं[3] निपात्य[4] दध्ना लवणोदकमिश्रेणाभ्युक्ष्य जपत्यांघ्नन्ति कंसं दक्षिणतः ' कुर्कुरः[5] सुकुर्कुरः[5] कुर्कुरो[5] वालबन्धनः[6] । उपरिष्टाच्छेदज्ञाय तृतीयस्यामितो दिवि ॥ श्रौलव[7] इत्तमुपाह्वयाथार्त्तिच्छामः[8] शबलः । अधोराम उलुम्बलः सारमेयो ह धावति समुद्रमिव[9] चाकशत्[10] ॥ विश्वनिष्कं[10] च रुकां च श्रुनामग्रं[11] सुवीरिणः[12] । सुवीरिण[13] सृज सृजैकव्रात्य[14] श्रुनक[14] सृज हत् ॥ तत्सत्यं यत्त्वेन्द्रो ऽब्रवीद्वा स्वाशयस्वेति[15] तास्त्वं[16] स्वाशयित्वागच्छस्तं[17] त्वाब्रवीद्विदद्धा[17] इत्यविदं[17] हीति[18] वरं वृणीष्वेति कुमा-

1) Thus N, Bh *śvā upasprste*, G *śvo bhūte* 2) Thus Bh, N समाया, G *samādhāya* 3) Thus N Bh, G °*kṣesūkta* 4) G om 5) Thus G, N कुक्कुर स कुक्कुरो, Bh *krkuras sukrkura* 6) G *vālabandhanah*, N वात्येवधता 7) Thus Bh, G *aulasa* 8) G *uttam upāhvayatāthājjirchsyamaś*, N -त्तमुपाह्वय वात्तोभ्या, see HG II 7 2, Āp MB II 16 2 9) Thus N, G *samudra iva* 10) G *cākaśacibhranniṣkan*, N °त्रिपुर्नि° 11) Thus N, G *śvanām*° 12) G om, N च वीरिषा 13) G *suvirana*, N सुविरीषा 14) G °*vrātyaścanaka*, N सृनैक चात्म स्पुनय 15) G *spāyaśasveti*, N स्मायशोति 16) G *tāmstvam*, N तात 17) G °*avidahayity*°, N °गह्र । तत शातवीर् विद्त्ताश इत्य° 18) G *iti*, N क्षोति

रमिवाहं वरं वृण इत्यब्रवीः ॥ निगृह्य बाहू प्रवसे[1] ज्यामिव[2] चाकशत् ॥ विश्वन्निष्कं च रुक्मं च शुनामग्रं सुवीरिणः[3] । सुवीरिणा[4] सृज सृजैकव्रात्य शुनक सृज ह्रत् ॥ तत्सत्यं यत्ते सरमा माता लोहितः पिता । अमी ये[5] के[5] सरस्यका अवधावति तृतीयस्यामितो दिवि ॥ तेकश्च ससरमतण्डुलः कुलश्च विकुलश्चार्जुनश्च लोहितश्च[6] । उत्सृजेमं[6] शुचीमनस्त्वं पिशङ्गलोहितः[7] ॥ उला ह नाम वो माता मण्डाककों[8] ह वः पिता । छदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर ॥ संतत्वा हन्ति चक्री वो[9] न सीसरीदत । छदपेहि सीसरम[10] सारमेय[10] नमस्ते अस्तु सीसर ॥ समश्वा[11] वृषणः पदो न सीसरीदत । श्वानमिच्छादन्न पुरुषं[12] छदिति ' त्रिः प्रातर्मध्यंदिने सायमगदो हैव[13] भवतीत्याह[13] ' ततः कुर्याद्यदि नागदः[14] स्यात् ' ॥ ७ ॥

शूलगवं व्याख्यास्याम ' आपूर्यमाणपक्षे पुण्ये नक्षत्रे

---

1) G *svavase*, N प्रवसे 2) G *jyām°*, N corr 3) G *subīranah*, N सुवीरिणा 4) G *subirana*, N सुवीरिणा 5) Thus G, N एये 6) G *°laścotvajemam*, N °तश्चोत्सृजेम 7) Thus G, N °रोहित 8) G *kandākako*, N मण्डाकको 9) Thus N, G *vera* 10) N सीसरम°, G *sisārameya* 11) Thus N, G *samaśca* 12) G *gata*, N परिविष्ट, see Āp MB II 16 11. 13) Thus N Bh, G *vetyāha* 14) Thus N Bh, G *vānadata*

पयसि स्थालीपाकं श्रपयित्वा प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य स्थण्डिलं कल्पयित्वाग्निमुपसमाधाय संपरिस्तीर्यापरेणाग्निं द्वे कुटी कृत्वा शूलगवमांवाहयत्या त्वा वहन्तु हरयः सुचेतसः[1] श्वेतैरश्वैः सह केतुमद्भिः । वाताजिरैर्मम हव्याय शर्वोमिति ' दक्षिणस्यां शूलगवमुत्तरस्यां मीढुषीं मध्ये जयन्तं ' यथोढमुदकानि प्रदाय त्रीनोदनानुद्धृत्य यथोढमेवोपस्पर्शयत्युपस्पृशतु[2] मीढ्वान्मीढुषे स्वाहोपस्पृशतु मीढुषी मीढुष्यै स्वाहा जयन्तोपस्पृश जयन्ताय स्वाहेति ' शूलगवस्याग्निमभ्युदाहृत्य जुहोति भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वाहा रुद्राय देवाय स्वाहा पशुपतये देवाय[3] स्वाहा महते देवाय स्वाहेति ' ॥ ८ ॥

पत्न्योदनस्य पत्नीभ्यो जुहोति भवस्य देवस्य पत्न्यै स्वाहा शर्वस्य देवस्य पत्न्यै स्वाहेशानस्य देवस्य पत्न्यै स्वाहोग्रस्य[3] देवस्य[3] पत्न्यै[3] स्वाहा भीमस्य देवस्य' पत्न्यै स्वाहा रुद्रस्य देवस्य पत्न्यै स्वाहा पशुपतेर्देवस्य

---

1) G *suketubhi*, N स्वुसचेतस ; see MS II 9 1, HG II 8 2, Āp MB II 18 10 2) G °*vopaspṛśannupaspṛśatu*, N °वोपस्पृशति उपस्पृशति, Bh *upasparśayitvā* 3) G om

पत्न्यै स्वाहा मरुतो देवस्य पत्न्यै स्वाहेति ' जयन्ताय स्वाहेति मध्यमस्य जुहोति ' सर्वेषामोदनानां सकृत्सकृत्समवदायाभिघार्य जुहोत्यग्नये स्विष्टकृते स्वाहेत्यथोपतिष्ठते स्वस्ति नः पूर्णमुखः परिक्रामत्वित्यथातः पर्णविहारो ' गृहपोपस्पृश गृहपाय स्वाहा गृहप्युपस्पृश गृहप्यै स्वाहा जयन्तोपस्पृश जयन्ताय स्वाहेति षट् पलाशान्यथापराणि घोषिण उपस्पृशत घोषिभ्यः स्वाहा श्वासिन उपस्पृशत श्वासिभ्यः स्वाहा विचिन्वन्त उपस्पृशत विचिन्वद्भ्यः स्वाहा प्रचिन्वन्त उपस्पृशत प्रचिन्वद्भ्यः स्वाहा समश्नन्त उपस्पृशत समश्नद्भ्यः स्वाहेति दशाथापराणि देवसेना उपस्पृशत देवसेनाभ्यः स्वाहेति दशैवाथापराणि या आख्याता देवसेना याश्चानाख्याताश्च ता उपस्पृशत ताभ्यः स्वाहेति दशैव ' ॥ १ ॥

अथापराणि द्वारपोपस्पृश द्वारपाय स्वाहा द्वारप्युपस्पृश द्वारप्यै स्वाहेति चत्वार्यथ पर्णपुटं 1) कृत्वा तस्मिन्नुपस्तीर्णाभिघारितमोदनपिण्डं समवदाय 2) परोगोष्ठे 2) वृक्ष आसजति निषङ्गिण उपस्पृशत निषङ्गिभ्यः 3) स्वा-

---

1) G *pamkuputam*, N वर्पायुग, Bh *parnapūgam*

2) Thus N, G °*dāyāpare goṣṭhe*, Bh *aparagosthe*

3) G *niṃmgibhya*, N निषङ्गिणो

ह्येत्यथोपतिष्ठते नमो निषङ्गिण[1] इषुधिमत[2] इत्यथप्रतीक्षमित्याथान्वासारिभ्यो जुहोत्यन्वासारिण उपस्पृशतान्वासारिभ्यः[3] स्वाहेति द्वे पलाशे ' अथोपतिष्ठते[4] नमस्ते रुद्र मन्यव इत्येतैरेकादशभिरनुवाकैः प्रथमोत्तमाभ्यां वाभित एतमग्निं[5] गा[5] स्थापयति[5] यथा धूममाजिघ्रेयुरित्याज्यशेषमोदनशेषमुदकुम्भशेषमित्येकधा समवनीयोदुम्बरशाखया प्रदक्षिणं[2] गाद्भिः[6] प्रोक्षति शिवं गोभ्यः शिवं गोपतय इत्यृषभस्य पृष्ठे शेषं निनयत्येतं युवानमित्येताभिः पञ्चभिरथातः क्षेत्रपत्यस्य[7] ' गवां मार्गे ऽनग्नौ[8] क्षेत्रस्य पतिं यजते क्षेत्रस्य पतये स्वाहेति चतुर्षु सप्तसु वा पलाशेषु ' तं तथावाहयति[9] यथा शूलगवं ' तूष्णीं यजते ' पाको देव ' उपतिष्ठते क्षेत्रस्य पतिना वयमिति द्वाभ्यामथैनं क्षेत्रपत्यं[10] ये[11] सनाभयो[11] भवन्ति ते प्राश्नन्ति[12] यथा वैषां कुलधर्मो भवति ' ॥ १० ॥

अमावास्यायामपराह्णे मासिश्राद्धमपरपक्षस्य[13] वायु-

1) Thus N Bh; G *niṣhina* 2) G om 3) G om the visarga
4) Thus Bh; G N corr 5) Thus G Bh, N °ग्निंमास्थापयन्ति
6) G om *gās* 7) Thus Bh; G N *kṣetra°* 8) G Bh *nāgnau*
9) Thus N Bh, G *tantaiānnayati* 10) Thus Bh, G N *kṣetra°*
11) G *esanābhayo*, N सेनाद्यो 12) Thus Bh; G *prāśna*; N प्राश्नन्ति
13) Thus N Bh, G *°pakṣasu*

ह्वयन्तु' पितृभ्यो ऽन्नं संस्कृत्य प्राचीनावीतं कृत्वाग्निमुपसमाधाय दक्षिणाप्रागग्रैर्दर्भैरग्निं परिस्तीर्य दक्षिणापूर्वमवान्तरदेशमभिमुखः[1] पितॄनावाहयत्यायात पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः । प्रजामस्मभ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं च ॥ आयात पितामहाः प्रपितामहाश्चानुगैः सह[2] । असुंगमाः[2] सत्ययुजो ऽवृकासः । आ नो हवं पितरो ऽभ्यागमन्तु । इह गच्छन्तु पितरो हविषे अत्तवा[3] इत्येतामेव दिशमभ्यपः[4] प्रसिच्यापो देवीः प्रहिणुतेमं यज्ञं पितरो नो जुषन्तां[5] मासीनामूर्जमुत[5] ये भजन्ते ते नो रयिं सर्ववीरां नियच्छन्त्विति' परिषिच्य जुहोति याः प्राचीः संभवन्त्याप उत्तरतश्च याः । अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरन्तरन्यं पितुर्दधे ऽमुष्मै स्वाहा ॥ अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या । दिवा दिग्भिरनन्ताभिरूतिभिरन्तरन्यं[6] पितामहाद्दधे ऽमुष्मै स्वाहा ॥ अन्तर्दध ऋतुभिरहोरात्रैः[7] ससंधिकैः[7] । अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधे ऽमुष्मै स्वाहा ॥ यदः

---

1) G *dakṣinam°* 2) Thus Pr, G *sahāyumgamās*, N सहासुंगमास्
3) Thus G, N अत्तव, Pr *attave* 4) G *°āpa*, N °ऽयाप 5) G N Pr *juṣantāmāsīnām°* 6) G om *ūtibhir* 7) Thus G, N °सुसंधिभिः, Pr *°rātraiśca sandhigaiḥ*

क्रव्यादङ्गमदहल्लोकानयं[1] प्रणयञ्जातवेदाः । तद्वो अहं पुनरावेशयाम्यरिष्टाः सर्वैरङ्गैः संभवत पितरः[2] स्वधा नमः पितृभ्यः[3] स्वाहेति' ॥ ११ ॥

अथान्नस्य जुहोत्यग्नये पितृमते स्वाहा सोमाय पितृमते स्वाहा यमायाङ्गिरस्वते पितृमते स्वाहा स्वधा नमः पितृभ्यः स्वाहाग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः पितृभ्यः[3] स्वाहेति' परिषिच्य दक्षिणतो दर्भमुष्टिं निधाय तस्मिन्दक्षिणापवर्गांस्त्रीनुदकाञ्जलीनुपनिनयत्यसाववनेनिक्ष्वेति[4] पितरमसाववनेनिक्ष्वेति[5] पितामहमसाववनेनिक्ष्वेति[6] प्रपितामहमंत्रैव[7] नामादेशमवाचीनपाणिस्तस्मिन्दक्षिणापवर्गांस्त्रीन्पिण्डान्निदधात्येतत्ते ततासौ मधुमदन्नं सरस्वतो यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावती त एतां मात्रां भूतां ददामि यथाग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रे[8] ऽक्षितोऽनुपदस्तः[2] स्वधा भवतां त्वं स्वधामक्षितं तैः सहोपजीव यांश्च[9] त्वमत्रान्वसि[9] ये च त्वामनु ॥ एतत्ते[10] पितामहासौ मधुमदन्नं

1) Thus Pr, G °*adamgāllokānnayan*, N °दहल्लोकान्नयन् 2) G Pr om the visarga 3) G om the visarga 4) Thus N, G °*animkṣveti*, Bh °*avanimkṣveti*, Pr *avaneniyumkṣva* 5) Thus N, G °*amkṣveti*, Pr *avaneniyumkṣva* 6) Thus N, G °*avanimkṣveti*, Pr *avaneniyunkṣva* 7) N om from प्रपितामहम् unto स्वधामक्षित l 15 8) Thus Pr, G *pitrai* 9) Thus G N, Pr *yamścātramatvānimasi* 10) N om from एतत्ते unto यत्र पितरो p 45 l 11, inserting इति before यत्र

सरस्वती यावान्वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावती त एतां मात्रां भूतां ददामि यथा वायुरक्षितो ऽनुपदस्त एवं मह्यं पितामहायाक्षितो ऽनुपदस्तः[1] स्वधा भवतां त्वं स्वधामक्षितं तैः सहोपजीव यांश्च त्वमत्रान्वसि ये च त्वामनु ॥ १२ ॥

एतत्ते प्रपितामहासौ मधुमदन्नं सरस्वती यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां मात्रां भूतां ददामि यथादित्यो ऽक्षितो ऽनुपदस्त एवं मह्यं प्रपितामहायाक्षितो ऽनुपदस्तः[1] स्वधा भवतां त्वं स्वधामक्षितं तैः सहोपजीव यांश्च त्वमत्रान्वसि ये च त्वामनु॥ अत्र[2] पितरो[2] यथाभागं मन्दध्वमित्युक्त्वा पराङावर्तत' ओष्मणो[3] व्यावृत उपास्ते' व्यावृत्त ऊष्मण्यभिपर्यावर्तते ऽव्यावृत्ते वामीमदन्त पितरः सोम्या[4] इत्यभिपर्यावृत्य[5] नमस्कारैरुपतिष्ठते नमो वः पितरो रसायेति प्रतिपद्याहं तेषां वसिष्ठो भूयासमित्यन्तेनाद्भिः पात्रं प्रक्षाल्य पूरयित्वा[6] प्रसव्यं[6] त्रिः परिषिञ्चति पुत्रान्पौत्रानभितर्पयन्तीरापो मधुमतीरिमाः। स्वधां पितृभ्यो अमृतं दुहाना

1) G Pr om the visarga 2) Thus N Pr, G *tato* 3) Thus N, G Pr *ūṣmaṇo* 4) Thus G, Bh *saumyā*, Pr *saumyāsaḥ* 5) Thus Bh Pr, G *iti paryābhṛtya*, N इत्यभिपर्यावृत्य 6) Thus N Bh, G *°tvāpasavyam*, Pr *aprasavyam*

आपो देवीरुभयांस्तर्पयन्तु ॥ ऊर्जं वहन्तीः[1] क्षीरमुदकं घृतं पयः कीलालं परिस्रुतं नदीरिमा उदन्वतीर्वेतस्विनीः[2] सुतीर्थ्या[3] अमुष्मिन्लोक उप वः क्षरन्तु । ऊर्जस्वतीः पयस्वतीर्मधुना घृतेन स्वधा स्थ तर्पयत मे पितॄनित्यंप्रतीक्षमेत्य ॥ १३ ॥

अथान्नमभिमृशति पृथिवी ते पात्रं द्यौरपिधानं[4] ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन्लोके पृथिवी[5] समा[5] तस्याग्निरुपद्रष्टर्चस्ते[5][6] महिमा ॥ पृथिवी ते पात्रं[7] द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन्लोके अन्तरिक्षं समं तस्य वायुरुपद्रष्टा सामानि ते महिमा ॥ पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन्लोके द्यौः[8] समा तस्यादित्य उपद्रष्टा यजूंषि ते महिमेति ब्राह्मणानन्नेन परिविष्य

---

1) G N Bh Pr om the visarga 2) G °vedasanis, N उदस्वतीर्वेतस्विनी, Pr °vedasunis 3) Thus N, G *sutirtiā*, Pr *sutirtthā* 4) Thus N, G °*abhidhānam* 5) Thus G N, see, however, Baudh Dh II 8 14 12, comp also Caland, Altind Ahnencult p 99 6) Thus N, Pr °*upadraṣṭā | ṛcas*°, G °*upadṛṣṭvā ṛcas*° 7) *From this point unto* ब्राह्मणान° 1 16 G N abbreviate 8) G *dyau* +, N द्यौ समा, Pr *dyaus samā*

प्रदिष्टमुदपात्रं चादाय[1] दक्षिणपूर्वमवान्तरदेशं गत्वा प्रदिष्टमुदपात्रेणोपप्रवर्तयति[2] परायात पितरः सोम्या गम्भीरैः पथिभिः[3] पूर्व्यैः । अथ मासि पुनरायात नो गृहान्हविरत्तुं सुप्रजसः सुवीरा इति ' सर्वतः समवदाय शेषस्य प्राश्नातीदमन्नं पूर्यतां[4] चापूर्यतां[4] च[4] तन्नः सह देवैरमृतमस्तु प्राणेषु त्वामृतं जुहोमि स्वाहेति ' ॥ १४ ॥

अष्टकां व्याख्यास्याम ' उपरिष्टान्माघ्याः प्राक्फाल्गुन्या[5] यो बहुलस्तस्याष्टमी[6] ज्येष्ठया संपद्यते ' तामेकाष्टकेत्याचक्षते ' तस्यां संभारानुपकल्पयते[7] ' गां प्रशस्याष्टकापूपं चतुःशरावं तूष्णीं निर्वपति ' षट्कपालो भवत्येककपालो वा ' तस्य दार्विहोमिकः[8] संस्कारस्तामौपासने[9] श्रपयित्वौपासन एव जुहोत्युलूखला ग्रावाणो घोषमक्रत हविः कृण्वन्तः परिवत्सरीणाम्[10] । एकाष्टके सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणां स्वधा नमः पितृभ्यः स्वाहा ॥ अयं चतुःशरावो घृतवानपूपः[11] पयस्वानग्ने[11]

---

1) Thus N Bh, G *cāvadāya* 2) Thus Bh, G corr, N प्रतिष्ठितमुदपात्रेणाप प्र° 3) G om 4) G *pūrtāñcāpūryyatāñca*, N पूर्यता च, Bh *āpūryyatāñcāpūryyatāñca* 5) Thus Bh, G *°phālenyā*, N om 6) Thus N Bh, G *balastasyāmiṣṭami* 7) Thus G Bh, N °पकल्पो 8) G corr, N दार्विहोमिक, Bh *dārvikahomika* 9) G *°tām°* 10) N परिवत्सरीणा, G *parīnam* 11) N °पूपश्च पयस्वा°, G *ghṛtavāna yasvām agne*

रयिमान्पुष्टिमांश्च । प्रतिगृह्णन्तु पितरः संविदानाः[1] स्विष्टः सुकृतो ऽयं ममास्तु स्वधा नमः पितृभ्यः स्वाहा ॥ वहापूपं जातवेदः पितृभ्यो यत्रैनान्वेत्थ[2] निहितान्पराके । अपूपकुल्या[3] उप तान्क्षरन्तु सत्या एषामाशिषः[4] सन्तु[4] कामैः[4] स्वधा[5] नमः[5] पितृभ्यः स्वाहेति ' पुरस्तात्स्विष्टकृत एता आहुतीर्जुहोति पूर्णा पश्चाद्यमग्ने अयासि प्रजापत इति तिस्रस्ततः सौविष्टकृतं जुहोत्यग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः पितृभ्यः स्वाहेति ' ॥ १५ ॥

श्वो भूते पितृभ्यो गामालभते ' ऽग्निमुपसमाधाय यथा पुरस्तादाज्येन प्रायश्चित्तं कृत्वैकेन[6] बर्हिषैकशूलया च वपाश्रपण्योपाकरोति ' पितृभ्यस्त्वा जुष्टामुपाकरोमीतीमां[7] पितृभ्यो गामुपाकरोत्यूर्जस्वती पयस्वती तां मे जुषन्तां[8] पितरः[8] समेताः । मेदस्वती घृतवती स्वधावती सा मे पितॄन्सांपराये[9] धिनोत्वित्युपाकरणीयां[10] कृत्वा पितृभ्यस्त्वा जुष्टां प्रोक्षामीति प्रोक्षितां पर्यग्निकृतां प्रत्यक्शिरसं दक्षिणापदीं संज्ञपयन्ति ' संज्ञप्ताया[11] अद्भि[11] प्राणाना-

---

1) G N om the visarga 2) Thus G, N यत्रैता° 3) Thus N, G *apūpah kulya* 4) Thus N G *eṣāmaśumaih* 5) G *om* 6) Thus N Bh, G *hutvaika* 7) Thus G, N °मोति गा 8) G *juṣi* *ras*, N रयात्ता° 9) Thus G N, see HG II 15 2 10) G *dhinostvi°*, N चित्तोस्त्वि° G N °*upākaraniyam*, Bh *upakaraniyumāhutim* 11) Thus Bh G *samjnapayitarotbhih* N संज्ञप्ताया अद्भि

प्याय्य [1] तूष्णीमिव [2] वपामुद्धृत्य हृदयमुद्धरति [3] प्रज्ञाति च [4] मतस्ने 'औदुम्बर्यां वपाश्रपण्यां वपां श्रपयित्वौदुम्बरेषु शूलेषु [5] पृथगितराणि [6] श्रपयित्वौदुम्बर्या दर्व्योपस्तीर्णाभिघारितां वपां जुहोति वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके । मेदसः कुल्या उप तान्त्स्रवन्तु सत्या एषामाशिषः सन्तु कामैः स्वधा [7] नमः [7] पितृभ्यः [7] स्वाहेति ' ॥ १६ ॥

उपस्थिते [8] ऽन्न [8] ओदनस्य [8] मांसानामिति समवदाय सर्पिर्मिश्रस्य [9] जुहोत्येकाष्टकां पश्यत दोहमानामन्नं मांसवद्घृतवत्स्वधावत् । तद्ब्राह्मणैरतिपूतमनन्तमक्षय्यं [10] मे [11] अस्तु स्वधा नमः पितृभ्यः [12] स्वाहा ॥ एकाष्टका तपसा तप्यमाना संवत्सरस्य पत्नी दुदुहे [13] प्रपीना । तां दोहमुपजीवाथ पितरः सहस्रधा मुच्यमानां [14] पुरस्तात्स्वधा नमः पितृभ्यः स्वाहा ॥ वहान्नं जातवेदः पितृभ्यो यत्रैनान्वेत्थ [15] निहितान्पराके । अन्नस्य कुल्या

---

1) Thus N, Bh °āpyāya, G om pyāyya 2) G om tūṣṇī, N तुष्णीं 3) Thus Bh, N °उरत्त, G om 4) Thus Bh, G N om 5) Thus G Bh, N सल्नेषु 6) Thus G Bh, N यथनि° 7) Thus N, G pitṛbhya svadhā nama 8) Thus N Bh, G upasthitaudanasya 9) Thus N Bh, G sammiśrān 10) N °रतिपूर पुतातमत्तय, G °atipratamanta makṣayyam 11) G om 12) G om the visarga 13) G daduhe, N दुरे 14) Thus G, N दुह्यमाना 15) Thus G, N यत्रैतान्वे°

उप तान्क्षरतु सत्या एषामाशिषः सन्तु कामैः स्वधा[1] नमः[1] पितृभ्यः[1] स्वाहेति 'पुरस्तात्स्विष्टकृत एतानुपहोमाञ्जुहोतीयमेव[2] सा या प्रथमा व्यौच्छदेकाष्टका तपसा तप्यमाना या प्रथमा व्यौच्छत्संवत्सरस्य प्रतिमां प्रजापत इति पञ्च 'ततः सौविष्टकृतं जुहोत्यग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः पितृभ्यः स्वाहेति 'श्वो भूते पितृभ्यो मांसशेषेण मासिश्राद्धस्यावृता श्राद्धं[3] करोति ' ॥ १७ ॥

वेदमधीत्य स्नास्यन्नुपकल्पयते पालाशीं[4] समिधमुदपात्रं चैरकां चोपवर्हणं च स्नानीयपिण्डं च सार्वसुरभिपिष्टं चन्दनं च सूत्रं सोपधानं मणिं सशाणं बादरं मणिमुत्तरासङ्गं च सान्तरमहते च प्रवर्तौ[5] च स्रजं चाञ्जनं चादर्शोपानहौ[6] दण्डं च छत्रं चाथ नक्षत्राणि तिष्य[7] उत्तरे फल्गुनी हस्तश्चित्रा[8] स्वाति विशाखे इत्येतेषामेकस्मिन्पुरोदयादादित्यस्य व्रजं प्रपद्यत 'एतदहःस्नातानां[9] ह वा एष एतत्तेजसा[10] तपति' तस्मा-

1) Thus N, G *pitṛbhya svadhā nama*, see p 49 note 7 2) G *etāmupahomām ju°*, N उपहोमाजु° 3) Thus N Bh, G *masiśrāddham* 4) Thus N Bh, G *palaśam* 5) Thus N, G *pravṛttau* 6) Thus G N 7) G *taṣya*, N तिष, see HG I 9 3 8) G N *hasta citrā* 9) MSS om the visarga 10) N om एतत्

देनमेतदहर्नाभितपेद्दलोम्ना चर्मणा द्वारमपिधाय पूर्वार्धे व्रजस्याग्निमुपसमाधाय मध्यंदिने पालाशीं समिधमादधातीमं स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया[1]। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव स्वाहेति' तत एतान्संभारान्सकृदेव सर्वानाहृत्य तानुत्तरतोऽग्नेर्निधायापरेणाग्निमुत्तरतःपरिषेवनामेरका-मास्तीर्य तस्यामुदक्शिरा निपद्यते' ॥ १८ ॥

दक्षिणतो नापित उपविशति। तस्य क्षुरमभिमन्त्रयते शिवो नामासि स्वधितिस्ते पिता। नमस्ते अस्तु मा मा हिंसीरित्यद्भिरुद्यमानमभिमन्त्रयते शिवा मे भवथ संस्पृश इति'[2] क्षुरमभिनिधीयमानमभिमन्त्रयते यदृषीणां त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषमिति 'वपन्तं यत्क्षुरेण मर्चयता सुपेशसा[3] वप्त्रा[4] 'वपसि वर्चसा मुखं मा न[5] आयुः प्रमोषीरिति' श्मश्रूणि वापयित्वोपपक्षौ निवापयतेऽथ केशान्यथोपपा-दमङ्गान्येवमेवात[6] ऊर्ध्वं वापयते 'पश्चार्धे व्रजस्योपवि-श्य[7] मेखलां विस्रस्य परिकर्मणे प्रयच्छतीमां हृत्वा

---

1) Thus N, G *mantṛā* 2) N ins ऋत 3) Thus N, G *sampaśasā*
4) Thus G, N वप्ता, see HG I 9 16, AV VIII. 2. 17 5) G *nu*, N न
6) G N Bh °*yathopapātam*° 7) Thus N Bh, G *praśasya*

स्तम्ब उपगूहेति ' तां स हृत्वा स्तम्ब उपगूहतीदमहममुष्यामुष्यायणस्य द्विषन्तं भ्रातृव्यमुपगूहाम्युत्तरोऽसौ द्विषद्भ्य इति ' तत आप उपशेरत उष्णाश्च शीताश्च ' शीतास्वुष्णा आनयति दैवमानुषस्य व्यावृत्त्या इति विज्ञायते ' संसृष्टाभिरद्भिरभिषिञ्चत्यापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन ' स्नानीयेन प्रताप्य[1] ॥ ११ ॥

दन्तान्प्रक्षालयतेऽन्नाद्याय व्यूहध्वं सोमो राजेदमागमत्[2]। स मा प्रविशत्वन्नाद्येन भगेन च दीर्घायुरहमन्नादो भूयासमिति ' सार्वसुरभिणा प्रलेप्स्यमानः[3] प्रोक्षति नमः शाकजञ्जभाभ्यां[4] नमस्ताभ्यो देवताभ्यो या[5] अभिग्राहिणीरित्यथानुलिम्पेद्यद्वर्चो[5] अप्सरासु च गन्धर्वेषु च यद्यशः । दिव्यो यो मानुषो गन्धश्च[6] स[7] माविशतादिहेति ' समुन्नीय चन्दनेनानुलेप्स्यमान एवं प्रोक्षत्येवमनुलिम्पेद्यथाकृतमन्तरं[8] परिधत्त आयुरसीति ' जरामशीयेत्युत्तरं ' यज्ञोपवीतं कृत्वाप आचम्य जयाभ्यातानान्राष्ट्रभृत

1) Thus G Bh, N प्रतीप्य   2) Thus N, G *rājetham°*   3) Thus Bh G *pralepsamānah*, N corr   4) Thus G, N शाकजञ्जभाभ्यां, Bh *śākajañjapabhyām*   5) G om *yā*, N यभिग्रा°   6) Read गन्ध   7) Thus N G *sā*   8) Thus N, G °*anulimpetathātam*°

इति जुह्वैता[1] आकूतीर्जुहोति[1] दीक्षा तपो मनसो[2] मातरिश्वा बृहस्पतिर्वाचो अस्याः स योनिः । वेदांसि[3] विद्या मयि सन्तु चारवो[4] ऽग्निषोमा यशो अस्मासु धत्तम् ॥ अग्निर्येन विराजति सोमो येन विराजति सूर्यो येन विराजति विराजेन[5] विराजति तेनाहं विश्वतः परिविराज्यासमिद्दैकवृत्स्वाहेति[6] ' ॥ २० ॥

अपरेणाग्निं प्राङ्मुख उपविश्य[7] सोपधानं मणिं प्रवयति ' सपाशं वादरं मणिमुदपात्रे ऽवधाय प्रदक्षिणं पर्याप्लावयतीयमोषधे[8] त्रायमाणा सहमाना सहस्वती सा मा हिरण्यवर्चसं ब्रह्मवर्चसिनं मा करोत्विर्त्युद्धृत्याद्यणयेव[9] पर्याहृत्य प्रतिमुञ्चते[10] ऽपाशो ऽसीत्युरसि स्थापयत्युरो मे मा संशारीः शिवो मोपशेष्व मह्यं दीर्घायुत्वाय शतशारदायेति ' हस्तेन वादरं मणिमूर्गसीत्यर्को मणिर्ब्राह्मणस्य पुलको वैश्यस्य राज्ञो गर्दभसुग्रीवो ' ऽर्का मणिर्ब्राह्मणस्य वैश्यस्य पुलको मणिः । राज्ञो गर्दभसुग्रीवो

---

1) G *hutaitahutīr°* 2) N ins इति 3) Thus N, G *vedadasa* 4) G *carapo*, N चार् गो, see Āp Ś VI 23 1 5) Thus N, G *viramyena* 6) G *pariviādyāsamihaitaivkaāhā*, N परिविरा ज्यासमिद्दैकवृत्° , see Āp Ś VI 23 1 7) G ins *sūtram* 8) G *paryyāpūyati yamoṣadhe*, N पर्याप्लावयति यमोषधे, Bh *paryyāplāvayati yamoṣadhe*, see HG I 10 6 9) G *karoti uktadakṣinayaiva* N °त्युद्धृत्यैत्रेणाद्दपर्येत्र, Bh *uddhṛtyākṣiṇayaiva* 10) Thus N Bh, G *pramuñcate*

यस्य कस्य कपित्थक इति मणिधारणे गाथा[1] भवति' निधायाहतमन्तरं परिधत्त आयुषे त्वेति' जरामशीयेत्युत्तरमहतस्य[2] दशायां[2] प्रवर्तौ[3] प्रबध्य[4] दर्व्यामाधायाज्यस्योपघातं जुहोत्यायुष्यं वर्चस्यं सुवीर्यं रायस्पोषमौद्भिद्यमिदं हिरण्यमायुषे वर्चसे जैत्रियायाविशतान्मां[5] स्वाहा ॥ उच्चैर्वाजि पृतनाजित्सत्रसाहं[6] धनंजयम् । सर्वाः समृद्धीर्ऋद्धयो[7] हिरण्ये ऽस्मिन्समाहिताः[8] स्वाहा ॥ शुनमहं[9] हिरण्यस्य पितुरिव नामाग्रभैषम्[10] । तं मा हिरण्यवर्चसं पुरुषु प्रियं कुरु स्वाहा ॥ प्रियं मा देवेषु कुरु प्रियं मा ब्राह्मणे[11] कुरु । प्रियं विश्येषु शूद्रेषु[12] प्रियं राजसु मा कुरु स्वाहा ॥ संराजं च स्वराजं चाभिष्टीर्या च नो गृहे । लक्ष्मी राष्ट्रस्य या मुखे तया मा संसृजामसि स्वाहेति' ॥ २१ ॥

उद्धृत्य प्रक्षाल्य दक्षिणमेवाग्रे प्रतिमुञ्चत आयुष्यं वर्चस्यमित्येतदेव[13] मणिकुण्डलबन्धने विद्यादथ स्रजं

1) G Bh *gūdhā*, N --धौ 2) G °*ahatasyāśāyu*, N °त्तर हत सा दशाया, Bh *uttarıyadaśayām* 3) Thus N, G Bh *pravrttau* 4) G Bh *prabuddhya*, N corr 5) G *jaitrıyāyāmıśatum*, N जैत्रायाविशता मा 6) G *prtanājıstrāsāhan*, N पृतनासाह सभासाह, see HG I 10 6, Āp MB II 8 2, RVKh X 128 3. 7) G N *samrddhı rddhayo* 8) G om the visarga, N समा भृता 9) G *śūnam*° 10) Thus G, N °ग्रहैषम् 11) Thus N, G *brahmanā* 12) Thus N, G *rudreşu*, see HG I 10 6, Āp MB II 8 4 13) Thus N Bh, G °*etayaiva*

. . ◡ – . युभिके शिर आरोह शोभयन्ती मुखं मम । मुखं हि मम शोभय भूयांसं च भगं कुरु ॥ ग्रामाद्दूरञ्जमदग्निः श्रद्धायै कामायान्यै[1] । इमां तां[2] प्रतिमुञ्चे ऽहं भगेन सह वर्चसेत्यंथाड्ढे[3] यदाञ्जनं त्रैककुदं जातं हिमवत उपरि[4] मयि[4] पर्वतवर्चसमित्यादर्शमवेक्षते यन्मे वर्चः परापतितमात्मानं परिपश्यतः । इदं तत्पुनराददे भगेन सह वर्चसेति' वाग्यत आस्त[5] आ[5] नक्षत्राणामुदयादुदितेषु[6] नक्षत्रेषूपानहावुपमुञ्चते[7] द्यौरसीति दक्षिणां[8] पृथिव्यसीत्युत्तरामुपमुच्याभिमन्त्रयते[9] प्रतिष्ठे स्थो देवते[10] मा मा संतासमिति' दण्डमादत्ते लोके[11] वेदायास्मि[12] द्विषतो वधाय सपत्नाञ्छ्वापदान्सरीसृपान्हस्तिनश्चेति[13]' छत्रमादत्ते प्रजापतेः शरणमसि ब्रह्मणः छदिरित्युपनिष्क्रम्य दिशो ऽनुवीक्षते देवीः[14] षडुर्वीरुरु[15] नः कृणोतेति' चन्द्रमसमुदीक्षते मा रधाम द्विषते सोम राजन्निति' यत्रास्य रात्रिर्भवति तेन संभाष्य यथार्थमेतीत्येकमेवैतद-

---

1) Thus N, G *kāmādhīnyai* 2) Thus N, G *tāham* 3) G *°athāñtte*, N °थाड्ढे 4) Thus N, G *uparayi* 5) Thus N, G *āstā* 6) Thus N, G *°upadayād°* 7) After नक्षत्रेषु N ins उपनिष्क्रम्य 8) Thus Bh, G N *dakṣiṇam* 9) G N Bh *°abhimucyā°* 10) G ins *mā mā dābhyam* 11) Thus G Bh, N om 12) Thus G, N वेधागम 13) G *sapatnāñchāpa°*, N सपत्नाच्छाप° 14) N देवी, G Bh *daiviḥ* 15) Thus N, G *ṣaḍurvī āvaru*

परं ' तूष्णीमिव तीर्थे स्नात्वोदित्य तूष्णीं पालाशीं समिधमादधाति[1] ' संवत्सरं न मैथुनं चरति द्वादशरात्रं त्रिरात्रं वा सर्वा[2] स्थितयः[2] ' ॥ २२ ॥

अथार्घ्यं[3] ' जिह्वीर्पन्नर्घ्यं[4] वेदयते जिह्वीर्पामिति ' कुरुतेत्याह ' कंसे दध्यानीय मध्वानयति ' ह्रसीयस्यानीय वर्षीयसापिदधाति[5] ' पूर्वः कूर्चेन प्रतिपद्यते ' ऽन्वङ्पाद्येनान्वङ्घ्र्येणान्वङ्काचमनीयेनान्वङ्मधुपर्केणानुसंव्रजत्यथास्मा आसनमिति वेदयते ' तत्प्रतिमन्त्रयते[6] राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषमिति[7] राजा ब्राह्मणो वा ' राष्ट्रभृदस्यधिपत्यासन्दी मा त्वद्योषमिति ग्रामणीः सेनानीर्वाथास्मै पाद्यमिति वेदयते ' तत्प्रतिमन्त्रयत आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे । अस्मिन्कुले ब्रह्मवर्चस्यसानि मयि मह्यो मयि यशो मयीन्द्रियं वीर्यम् । आ मा गन्यशसा वर्चसा संसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ' सव्यं पादं प्रतिगृह्य दक्षिणं प्रतिगृह्णीयाद्दक्षिणं राजा ग्रामणीः सेननीर्वा ' ॥ २३ ॥

---

1) N ins इत्यपरं 2) Thus G Bh, N सर्वस्मिन्नगरं 3) Thus Bh, G *athān*, N अथार्घ 4) G ins *iti*, N द्वितीयनर्घ्यं 5) Thus N Bh, G *varṣiyasyā°* 6) From here unto आपः l 11 N om 7) G *tvavoṣam°*

अथास्मा अर्घ्यमिति[1] वेदयते' तदेतेनैव प्रतिमन्त्र्य[2] विराजो दोहो[3] ऽसि[3] विराजो दोहमशीय मयि दोहः पद्यायै विराज इति प्रतिगृह्य निनयति समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत । अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पय इत्यथास्मा आचमनीयमिति वेदयत' आचामत्यमृतोपस्तरणमसीत्याचान्तोदकायायास्मै मधुपर्क इति वेदयते' तत्प्रतिमन्त्रयते[4] यन्मधुनो मधव्यं परममन्नाद्यं रूपं तेनाहं मधुनो मधव्येन परमेणान्नाद्येन रूपेण परमो ऽन्नादो मधव्यो भूयासमिति' प्रतिगृह्य प्राश्नाति त्रय्यै विद्यायै यशो ऽसि यशसो यशो ऽसि ब्रह्मणो दीप्तिरसि तं मा प्रियं प्रजानां कुर्वधिपतिं[5] पशूनामिति' भूर्भुवः सुवरिति त्रिराचम्याथ रातये प्रयच्छति स्वयं वा सर्वं प्राश्नात्यथास्मा आचमनीयमिति वेदयत' आचामत्यमृतापिधानमसीत्याचान्तोदकायायास्मै गौरिति वेदयते' तां प्रतिमन्त्रयते गौरस्यपहतपाप्माप पाप्मानं जहि पाप्मानं मम चामुष्य च जहि द्विषन्तं हनीया[6] मम द्विषं कुरुतेति' ॥ २४ ॥

---

1) Thus G Bh, N घर्व° 2) N ins प्रतिगृह्णाति 3) Thus N Bh, G *dohāsı* 4) G om 5) Thus N, G *kurvantı paśum* 6) G *hatıthā*, N हणो

अथास्मा अन्नं संस्कृत्य भूतमिति वेदयते' तत आह ब्राह्मणांश्चतुरो नानागोत्रान्भोजयतेति' तेषु भुक्तवत्स्वन्नमाहरन्ति' तदेतेनैव प्रतिमन्त्र्य प्रतिगृह्य[1] प्रत्यवरुह्य[2] प्राश्नाति यथा[3] मधुपर्कं' प्रत्यवरुह्यैवात ऊर्ध्वमन्नानि प्राश्नीयादित्येकमथैतदपरमर्घ्येष्वेवैष नियमः[4] स्याद्यथाकामीतरेष्वथ यदि गामुत्सृजेत्तामभिमन्त्रयते गौर्धेनुभव्या[5] माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामदितिं वधिष्ट ॥ पिबतूदकं तृणान्यत्तु ॥ ओमुत्सृजतेत्यथ सोमप्रवाकाय' यत्रास्मै सोमं प्राह तद्यज्ञोपवीतं कृत्वाप आचम्य प्राङ्वोदङ्वा तिष्ठन्नुपत्यासीनो वा भूर्भुवः सुवरायुर्मे प्रावोचो वर्चो मे प्रावोचो यशो मे प्रावोचः श्रियं मे प्रावोच आयुष्मानहं वर्चस्वी यशस्वी श्रीमानपचितिमान्भूयासं[6] भूर्भुवः सुवः सर्वं भूयासमित्युक्त्वा प्रति वाचष्टे प्रति वा जानीत' एतेनैव भूतप्रवाकार्थो 'तन्मा जायीत्यन्तेन[7]' ॥ २५ ॥

अथास्मा अन्नं सनिमित्वाभिमन्त्रयते[8] ऽन्नमिव ते[9] दृशे[9]

1) Thus N Bh, G *pratihrsva* 2) Thus Bh, G *pratyaruhya*, N प्रत्यचह्य 3) Thus N Bh, G *yadā* 4) G Bh om the visarga, N corr 5) Thus G Bh, N °धेनुर्भव्या 6) G *śriyamān°* 7) G *kṣayi°*, N corr 8) Thus N, G *sannamitvā°*, Bh *sannamayitvā°* 9) G *tandṛśe*, N तेदृशे

भूयासं वित्तमिव ते[1] दृशे[1] भूयासं श्रीरस्यर्वाच्याविशास्मान्संस्रवन्तु[2] दिशो मह्वीः समागच्छन्तु सूनृताः । सर्वे कामा अभियन्तु मा प्रिया अभिरक्षन्तु मा प्रियाः ॥ यशोऽसि यशो ऽहं त्वयि भूयासमसावित्यभिमन्त्र्यार्थं[3] ब्रुवते' व्यवजिहीर्षमाणः पण्यस्यावदाय[4] जुहोति यदहं धनेन प्रपणं[5] चरामि धनेन देवा धनमिच्छमानः[6] । तस्मिन्सोमो रुचमादधात्वग्निरीशान इन्द्रो बृहस्पतिश्च स्वाहेत्यथ संवादजयनं[7] 'संवादमेष्यन्नात्तछत्रः सव्येन हस्तेन छत्रं[8] समावृत्य[9] दक्षिणेन फलीकरणमुष्टिं जुहोत्यवजिह्वक निजिह्वकाव त्वा हविषा यजे । तत्सत्यं यदहं वदाम्यधरो[10] मदसौ[11] वदात्स्वाहेति 'येन संवदते तमभिमन्त्रयत[12] आ ते वाचमास्यां[13] दद[13] आ मनस्यां हृदयादधि[14] । अङ्गादङ्गात्ते वाचमाददे यत्र यत्र ते वाङ् निहितां तां त आददे । तत्सत्यं यदहं वदाम्यधरो मत्पद्यस्वासाविति[15]' ॥ २६ ॥

1) Thus G, N तेनसे 2) Thus emended, G *śrıraservācyāvıdıśāsmāt°*, N श्रीरस्येवाच्याविशासमात° 3) G om *asāv* 4) Thus N Bh, G *punyasyā°* 5) G N *pramrnam*, see Āp MB II 22. 4 6) G *°ıchśamāh*, N °इमाना 7) Thus N, G *samvādajayınas*, Bh *samvādajayam* 8) Thus Bh, G *citram*, N छुत्र 9) Thus G Bh, N समादृय 10) Thus N Bh, G *°atharo* 11) N om मद्, G *°asā* 12) Thus N Bh, G *tad°* 13) Thus Mss, read probably वाचमास्याद् दद 14) Thus G, N हृदयदधिता 15) Thus N, G *°padyasvāhā*

यद्यस्मै सुभृत्याः[1] प्रव्रजेयुरग्निमुपसमाधायैडानि[2] जुहुयादनु यो[3] ऽस्मदनुक्षयो निवृत्तो वो न्यवीवृतत्[4]। ऐन्द्रः परिक्रोशो वः परिक्रोशतु सर्वतः ॥ यदि मामतिमन्यध्वमदेवा[5] देववत्तरम् । इन्द्रः पाशेन सित्वा[6] वो[7] मह्यमित्पुनरानयादिति[7] वदेद्वा ' खादिरं शङ्कुं निहत्य नीललोहिताभ्यां सूत्राभ्यामपसव्यैस्त्रिः परिविष्टयेदावर्तन वर्तयेत्यपि वै यदि दूरगा भवन्तीह हैव वर्तन्ते ' यं कामयेत[8] नायं मत्पद्येतेति[9] दक्षिणे पाणावभिपद्येत यस्मिन्भूतं च भव्यं च विश्वे देवाः समाहिताः । तेन गृह्णामि त्वामहं मह्यं गृह्णामि त्वामहं ब्रह्मणा त्वा गृह्णामीति ' न हैवास्मात्पद्यते[10] ' यं कामयेत नायं[11] मच्छिद्येतेत्यमावास्यां[11] रात्रिं सुप्तं[12] जीवविषाणे स्वं मूत्रमानीयापसव्यैस्त्रिः परिषिञ्चन्परीयात्परि त्वा गिरेरमिहं[13] परि भ्रातुः परि ष्वसुः । परि सर्वेभ्यो ज्ञातिभ्यः

---

1) Thus N Bh, G *suhrtyāh* 2) Bh °*dhāyayenvānı*, G °*dhāya yanvagnın*, N °धायेत्लानि 3) Thus G N Bh, read वो 4) G *nyamimrjat*, N corr , see Āp M B II 22. 9 5) G °*manyaddhvandeıā*, N °मन्यदेवा 6) G *sıktvā*, N शिक्ता, see PG III 7 3, Āp MB II 22 10, *HG I 14 4* 7) *G vo vahyamıtı punarāyād*°, N क्षेम-त्पुनराया इति 8) Thus N Bh, G *kāmata* 9) Thus Bh, G °*padyedetı*, N °पद्यातेति 10) Thus Bh, G °*padyante*, N corr 11) Thus Bh, G °*avāvāsyām*, N नापच्छियेति तमसावास्या 12) Thus Bh, G *suptān*, N सप्त 13) Thus Bh, G °*aharamıham*, N °रहमिद, see Āp MB II 22 5

परिपीतः[1] छोव्यसि[1] ॥ शश्वत्परिकुपितेन संक्रामिणा-वह्निा। उलेन परिमीढो[2] ऽसि परिमीढो[2] ऽस्युलेनेति न हैवास्मात्पद्यते दीर्घसत्त्वमासिष्यमाणः[3] ॥ २७ ॥

प्रवासमेष्यन्भार्यायाः परिदां करोति स्थूलाढारिका जीवचूर्णानि कारयित्वामावास्यायां रात्र्यां[4] सुप्तायामुपस्थं प्रतिवपति सोमावास्य परिघमन्येभ्यः पुरुषेभ्यो ऽन्यत्र मदिति यद्यस्यां बहुतयापीच्छन्ति[5] न हैव सिध्यन्ति यदि कामयेत सिध्येयुरिति बभ्रुमूत्रेण प्रक्षालयस्वेत्येनां[6] ब्रूयात्प्रवासमेष्यन्नामन्त्रयत इदं वत्स्यामः प्राणा आयुषि[7] वत्स्याम इत्यथैनमभिमन्त्रयत[8] आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। मा त्वा के चिन्नियेमुरिन्न पाशिनः। दधन्वेव ता इहि[9] ॥ प्राणा आयुषि वसासौ पृथिव्यामग्नौ प्रतितिष्ठ[10] वायावन्तरिक्षे सूर्ये दिवि यां स्वस्तिमग्निर्वायुः सूर्यश्चन्द्रमा आपो ऽनुसंचरन्ति तां स्वस्तिमनुसंचरासौ ॥ प्रच्यवस्व भुवस्पत इति प्रतिपद्य श्येनो भूत्वा परापते-

---

1) G *pariftadam tiveyasi*, N परिपीदमारेयसि 2) G *parilido*, N corr 3) G Bh *dirghasūtram°*, N दीर्घमा°, see introd 4) Thus N Bh, G *rātryām.* 5) Thus G, N Bh *bahutayā •ecchanti.* 6) G *prakṣālyasvainām*, N प्रक्षालयस्वेत्येना, Bh *prakṣālayetyenām* 7) G om from here unto *vasāsau* l 12 8) Thus Bh, N °थैनाम° 9) N इति 10) Thus N, G *pratitiṣṭhati*

त्यक्तेन 'यं कामयेत स्वस्त्ययं पुनरागच्छेदिति[1] तमेतेन त्र्यृचेनान्वीक्षेत[2] मह्नि त्रीणामवो[3] ऽस्त्वितीहैव[3] पुनरागच्छति 'यं कामयेत नायं पुनरागच्छेदिति तमन्वीक्षेत साकं यक्ष्म प्रपतेत्येतयैनमभिमन्त्रयते[4] परमां त्वा परावतमिन्द्रो नयतु वृत्रहा। यतो न पुनरायसि शाश्वतीभ्यः[5] समाभ्य इति 'न हैव पुनरागच्छति '॥ २८ ॥

अथ रथारोहणं 'यदि रथं लभत आपूर्यमाणपक्षे पुण्ये नक्षत्रे योजयित्वास्थास्यन्पक्षसी[6] अभिमृशति बृहदसीति[7] दक्षिणं[8] रथंतरमसीत्युत्तरं[9] वामदेव्यमसीति[10] मध्यममश्वमास्थाय[11] चक्रे संमार्ष्ट्यङ्कौ न्यङ्कावभित इत्यनुवाकशेषेण 'यदि शमरथो भवति तद्यज्ञोपवीतं कृत्वाप आचम्य भूमिमभिमृशतीह धृतिरिह स्वधृतिरिह रन्तिरिह रमतिरित्यथ हस्त्यारोहणं 'यदि हस्तिनं लभत आपूर्यमाणपक्षे पुण्ये नक्षत्रे कल्पयित्वाभ्युपविशतीदमहममुमामु-

---

1) Thus N Bh, G *purogachśed°* 2) G *ṛcanvī°*, N -नेनान्वी°, Bh *tryacenanvī°* 3) Thus N, G *trṇāmavostvihaiva*, Bh *°avarastu iti ihaiva* 4) Thus N Bh, G *prapadyatety°* 5) G *śaśvatibhyas*, N शाश्वतीभ्य्, see TB III 3 11 3 6) Thus emended, G *yojayitvāsthāsyan°*, N जयित्वा पक्षसी 7) Thus N Bh, G om 8) Thus G Bh, N दक्षिणा 9) Thus Bh, G *°uttara*, N °त्युत्तरा 10) Thus N Bh, G *vāmevyamasati* 11) G ins *ity* between *aśvam* and *āsthāya*, N मध्यमास्थाय, Bh *madhyamamiti sammṛśet āsthāya*

ब्यायणामिन्द्रस्य[1] वज्रेणाभिविशाम्युत्तरो[2] ऽहं द्विपन्न[3] इत्यथैनमभिक्रामयति[4] वह कालं वह श्रियं माभिवहेति[5]' समानं शमरथेन' यद्यनुपस्तीर्णे स्थण्डिल उपविशेत्तदनुमन्त्रयते नमः पृथिवीपदे रुद्राय वातिपवे रुद्राय नमो रुद्राय[6] पृथिवीपद इति' सर्पसृतौ सृजति[7] नमः सर्पसृते रुद्राय वातिपवे रुद्राय नमो रुद्राय सर्पसृत इति' शकृद्गीतौ[8] जपति नमः शकृत्सदे[9] रुद्राय वातिपवे रुद्राय नमो रुद्राय शकृत्सद इति' यदि नवानि गोमयान्यन्तरातिक्रामेद्रोष्ठमसीत्युक्त्वातिक्रामेत्[10]' ॥ २९ ॥

यदि चतुष्पथं समया[11] व्रजेत्तदनुमन्त्रयते[11] नमः पृथिवीपदे रुद्राय वातिपवे रुद्राय नमो रुद्राय पृथिवीपद इति' यदि श्मशानं समया व्रजेत्तदनुमन्त्रयते नमस्तत्सदे रुद्राय वातिपवे रुद्राय नमो रुद्राय तत्सद इति' नदीमुदन्वतीं दृष्ट्वा जपति नमो ऽप्सुपदे रुद्राय वातिपवे रुद्राय नमो रुद्रायाप्सुपद इति' यद्येनं संवर्तवात आ-

---

1) Thus Bh, G °ahamamuṣyāmuṣyāyanam°, N °हमुमाष्युष्यायणा°
2) G yajñenā°, N °णाम्युपविशाम्यु° 3) G dviṣak, N द्विपड्म
4) Thus G Bh, N °मतिक्रमयति 5) Thus N, G vāṃvaheti
6) G om from here unto शकृत्सद् l 8 7) Thus N alone, read probably जपति 8) Thus emended, N शकृद्गतौ, Bh śakṛdatau, see Āp G 0 3 9) N जपेतत्सदे 10) Thus emended, G °antarātrah kāmet°, N °न्तरायतिक्रमे° 11) Thus N, G samayādyajet°

गच्छेत्तदनुमन्त्रयते नमोऽन्तरिक्षसदे[1] रुद्राय[1] वातेषवे रुद्राय नमो रुद्रायान्तरिक्षसद इति 'यद्येनं सिचोपसृजेत्तदनुमन्त्रयते[2] सिगसि न सिगसि वज्रो नमस्ते अस्तु मा मा हिंसीरित्यद्भिरभ्युक्षेद्यद्येनं वयो[3] ऽभिविक्षिपेत्तदनुमन्त्रयते[4] ये पक्षिणः प्रथयन्ति बिभ्यतो[5] निर्ऋतेः[5] सह । ते मा शिवेन तिग्मेन[6] तेजसोन्दन्तु वर्चसेत्यद्भिरभ्युक्षेद्यद्येनं फलमभिनिपतेत्तदनुमन्त्रयते यदि वृक्षादभ्यपतत्फलं[7] यद्यन्तरिक्षात्तदु वायुरेव । यत्रास्पृक्षत्तनुवं[8] यत्र वास आपो बाधन्तां[9] निर्ऋतिं पराचीरित्यद्भिरभ्युक्षेद्यद्येनमवर्षे[10][11] प्रुषितमववर्षेत्तदनुमन्त्रयते[11] दिवो नु मा बृहतो अन्तरिक्षादपां स्तोको अभ्यपतच्छिवेन[12] समिन्द्रियेण मनसाहमागां ब्रह्मणा[13] क्लृप्तः[13] सुकृतेनेत्यद्भिरभ्युक्षेत्[14]' ॥ ३० ॥

---

1) Thus N, G *rudrāyāntarikṣasade* 2) G °*pasṛjeta tad*°, N सिचोपसर्त्तैत्तद° 3) Thus Bh, G *vāyo*, N वयासि 4) Thus Bh, G *ivikṣipet*°, N त्तिक्षिपेतद° 5) Thus G, N बिभृतो निऋति 6) Thus G, N ग्राम्मेन, see HG I 16 5, Āp MB II 22. 12 7) G °*abhyapatphalam*, N °भ्यपत--- 8) G *adhastātvṛkṣat*°, N यतासृक्षतदनुव, see Āp MB II. 22 12, HG I 16 7, AV VI 124 2 9) G *bālantān*, N वाधता 10) Thus G, N पराचारद्भिर° 11) G om *avarṣe pruṣitam*, N °ववर्षे पृषित, Bh *apavarṣe pruṣitam* 12) G *abhyupaptachśivena*, N अभ्यपतत् शिवेन, see HG I 16 6, Āp MB II 22 13, AV VI 124 1 13) G *brahmakḷptas*, N ब्रह्मणा क्लित्र 14) Thus G, N सुकृतेत्यद्भिरवोक्षेत्

चित्र्यं वनस्पतिं दृष्ट्वा जपत्यारात्ते अग्निर्ज्वलत्वारात्यरशुरस्तु[1] ते । निवाते त्वाभिवर्षतु जीव वर्षसहस्रं त्वम् । नमस्ते ऽस्तु वनस्पते स्वस्ति मे ऽस्तु वनस्पत इति' प्राङ्मध्यंदिनात्क्षीरिणो वृक्षानुपस्पृशेन्नित्यं न्यग्रोधं च' सर्वत्र[2] स्वयंप्रज्वलिते ऽग्नौ समिधावादध्याद्दीप्यस्व जातवेदो ऽपघ्नन्निरृतिं मम । पशूंश्च मह्यमावह जीवनं च दिशो दिशः[3] स्वाहा ॥ मा नो हिंसीज्जातवेदो गामश्वं पुरुषं पशुम् । अहिंसन्नग्न[4] आगहि श्रियं मयि परिपालय स्वाहेत्याधायोपतिष्ठते नमो अग्निपदे रुद्राय वातिपत्ये रुद्राय नमो रुद्रायाग्निपद इत्यनुभवं[5] परिभवं[5] परिवादं परिक्षवम्[6] । दुःस्वप्नं दुरुदितं[7] शकुनेस्तद्द्विषद्भ्यो दिशाम्यहम् ॥ अनुभूतं परिभूतं शकुनैर्यद्दशाकुनम्[8] । मृगस्य सृतमक्ष्णया[9] तद्द्विषद्भ्यो दिशाम्यहम् ॥ परेणैतु पापशकुनिः परेणैतु परिक्षवः[10] । अक्षिस्पन्दो[11] दुःस्वप्न[11] दृष्टिः संपन्नो[11] नो द्वेष्टि तमृच्छत्वित्येतं मन्त्रं जपत्युपस्थाय

---

1) G °*jvalite*°, N ज्वलितारात्र° 2) Thus G Ph, N सर्वत्र 3) MSS om the visarga 4) G *ahinnagna* N अहिं नग्न 5) Thus G N, Ph *anubhavam paribhavam* 6) Thus G, N परिक्षव 7) G *duritam*, N दुरुदितं, see AV XIX 8 4 from here unto मृगस्य l. 12 N has only स्तुदितं दु स्तदुतं 8) G °*ašakunam* 9) G *srtyam*°, N सृत्या° 10) G *parikṣayah*, N परिक्षव 11) Thus emended, G °*duṣvahadṛṣṭimsampannah*, N अक्षिस्पन्दौ दुरे देष्टि°

उपबाधे च यथालिङ्गं 'सर्वत्रैवाप[1] उपस्पृशेत्' ॥ ३१ ॥

अथैतान्यद्भुतप्रायश्चित्तानि[2] भवन्ति 'कुम्भं कपोत उपावेशीन्मध्यागार उपविशीत्स्थूणा व्यरोहीद्वल्मीक उदेति' सो ऽह्नःक्षान्तः[3] प्रयतवस्त्रो ब्राह्मणसंभाषो ऽस्तमित आदित्ये ऽन्तरागारे ऽग्निमुपसमाधाय[4] जयाभ्यातानाराष्ट्रभृत इति हुत्वैता आहुतीर्जुहोति पूर्णा पश्चादिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयास्ययाश्चाग्ने ऽस्यनभिशस्तीश्च यदस्य कर्मणो ऽत्यरीरिचं प्रजापत इत्युत्तमां हुत्वा ब्राह्मणानन्नेन परिविषयेदथैव पयसि स्थालीपाकः[5] पौष्ट्यः पशव्यः[6] स्वर्ग्य आयुष्यः[6] स्वयंभोज्यस्तेन यजेत सर्वेषु पर्वस्वौदुम्बरमिध्ममभ्याधायौदुम्बर्या दर्व्योपस्तीर्णाभिघारितं स्थालीपाकं जुहोति सहस्रमेतु प्रथमं बभ्रूय[7] यशसा सह । आगत्य बभ्रुः पिङ्गाक्षः सहस्रेणावकाङ्क्षतु[8] स्वाहा ॥ दिशो दिशो जातवेदो मह्यं जीवनमावह । पशूनां विश्वरूपाणां यथाहं सुमते वसानि स्वाहा ॥ देवानां संभृतो रसः प्राजापत्यं

---

1) Thus G, N Bh *sarvatrāpa* 2) G *°abhyudayaprāyaś°*, N °द्भुत°, Bh *°atbhutaya°* 3) G *haksatah*, N हस्तां त , Bh *ahah kṣātah*, see HG I 14 2, 17 6 4) From here unto ब्राह्मणान्° 1 9 G abbreviates 5) Thus N, G *°pākam* 6) G om the visarga 7) Thus G, N प्रभु 8) Thus G, N सहस्रेणाभिकाङ्क्षत

यशो महत् । जुहोम्यन्नानां रसमह्ना कीर्तिरस्तु मे स्वाहा ॥ अग्नावग्निश्चरति[1] प्रविष्ट ऋषीणां पुत्रो अधिराजा एषः[2] । स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्भागधेयम्[3] । मो[3] अस्माकं[3] मोमुहद्भागधेयं[4] स्वाहेति' यथोपदेशं काम्यानि बलयश्च' ॥ ३२ ॥

इति भारद्वाजसूत्रे द्वितीयः प्रश्नः ॥

एकाग्निर्द्वादशाहं विच्छिन्नः पुनराधेयः' स[5] एष[6] औपनायनिको[7] ऽग्निस्तत्रास्य[7] परिचर्या[8] समिद्भिर्ब्रह्मचर्ये[8] सायं प्रातर्यथोपदेशं' स्नात ओषधीभिर्यथोपपन्नेन वान्नेन[9]' स्त्री चैवं भर्तरि प्रमीते पाणिग्रहणादूर्ध्वं' पार्वणः पौर्णमास्याममावास्यायां[10] वा रोहिण्यां मृगशिरसि पुनर्वस्वोर्वा मध्यंदिन[11] आदधीतोद्धृते[11] ऽवोक्षिते सिकतोपोप्ते[12] परिश्रिते निदधाति' याज्ञिकात्काष्ठादग्निं[13]

---

1) G om from here unto मिथुया I 4   2) N एष , see AV IV 39 9, TS I 3 7 2, TB II 7 15 1 etc   3) G om , N om मा   4) G *momukhat°*, N मामुद°   5) G om   6) Thus G Bh, N एष   7) Thus Bh, G *aupāsanāyaniko°*, N औपसायनिकाग्नि°   8) Thus N Bh, G *paricaryyānyamidbhir°*   9) N om वा , G Bh ins. *ca* behind *annena*   10) Thus Bh, G *paurṇamāsyāmamāvāsyāyām*, N पौर्णमास्याममावास्यायां   11) Thus Bh, G *maddhyandine mādadhīta uddhate*, N मध्यंदिने मादधी°   12) Thus Bh, G *sikateposte*, N सिकतोपासे , Pr *sikatevopte*   13) Thus Pr, G Bh *yājñiyāt°*, N याज्ञिया°

मथित्वा लौकिकं वाहृत्य प्रणवेनाहरति[1] ' ब्रह्मा प्रणवेन प्रसौत्यासीनो[2] व्याहृतीभिः प्रणवेनादधाति[3] भूर्भुवः सुवरों पृथिव्यां त्वामृत आदधामि सत्ये त्वामृत आदधाम्यृते[4] त्वामृत आदधाम्यमृते त्वामृत आदधामि[5] विहाय[5] दौष्कृत्यं[5] साधुकृत्यमिति[5] ' तत एतैः पृथिव्यां[6] त्वामृत आदधामि सत्ये त्वामृत आदधाम्यृते[7] त्वामृत[7] आदधाम्यमृते[7] त्वामृत[7] आदधामीत्याज्येन चौषधीभिश्च शमनीयाभिराहुतीभिस्तिसृभिः शमयति या ते अग्ने पवमाना[8] पशुषु[8] प्रिया तनूर्या पृथिव्यां याग्नौ या रथंतरे या गायत्रे छन्दसीदं ते तामवरुन्धे तस्यै ते स्वाहा ॥ या ते अग्ने पावकाप्सु प्रिया तनूर्यान्तरिक्षे या वायौ या वामदेव्ये या त्रैष्टुभे छन्दसीदं ते तामवरुन्धे तस्यै ते स्वाहा ॥ या ते अग्ने सूर्ये शुचिः प्रिया तनूर्या दिवि यादित्ये या बृहति या जागते छन्दसीदं ते तामवरुन्धे तस्यै ते स्वाहेति ' तिस्र आश्वत्थीः[9] समिधो घृतान्वक्ता आदधात्यग्न

---

1) Thus G Bh, N °दधाति instead of °हरति 2) Thus Bh, G N *prasūty°* 3) Thus N Bh, G *praṇavena cādadhāti* 4) Thus N, G *ādadhāmi te*, Pr *ādadhāmi jane* 5) G °*dhāmīti vihāya dauṣkṛtyam sādhukṛtyam*, N °धामि हायश्रेथे मृत्य साधुकृत्य° 6) G abbreviates 7) N om 8) Thus G Bh Pr, N पशुषु पवमाना, see Āp Ś V 16. 4 9) MSS om the visarga.

आयूंषि पवस[1] इति[1] तिसृभिः ' समुद्रादूर्मिर्मधुमाँ[2] उदारदिति[2] तिस्रः शमीमयीः[3] ' प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरी[4] ' विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीं ' तां सवितुर्वरेण्यस्य चित्रामिति शमीमयी ' ततस्तूष्णीमौपासनं हुत्वा यास्ते अग्ने घोरास्तनुवः स्निश्च स्नीहितिश्चेत्येताभ्यामनुवाकाभ्यामुपस्थाय समानं[5] दार्विहोमिका परिचेष्टा ' दार्विहोमिकां परिचेष्टां कृत्वा ॥ १ ॥

आज्यमधिश्रित्योत्पूय स्रुवं च जुहूं च निष्टप्य संमृज्य चतुर्गृहीतेन स्रुचं पूरयित्वा द्वादशगृहीतेन वा पूर्णाहुतिं जुहोति ' सप्त ते अग्ने समिधः सप्त जिह्वा इत्येतामनुद्रुत्य[6] स्वाहाकारेण जुहोति ' हुतायां पूर्णाहुतौ वरं ददाति धेनुं वासो ऽनड्वाहं हिरण्यं वा ' स्रुचि[7] चतुर्गृहीतं गृहीत्वा तिस्रस्तन्तुमतीर्जुहोति तन्तुं तन्वन्नुद्बुध्यस्वाग्ने[8] त्रयस्त्रिंशत्तन्तव इत्यपरं चतुर्गृहीतं गृहीत्वा चतस्रो ऽभ्यावर्तिनीर्जुहोत्यग्ने ऽभ्यावर्तिन्नग्ने[9] अङ्गिरः पुनरूर्जा सह रय्येत्यपरं चतुर्गृहीतं गृहीत्वानुख्यां जुहोत्यन्वग्निरुषसा- .

---

1) Thus N, G *pavasva* 2) G °*madhumām udāra iti*, Pr °*madhumām udārad*, N °मधुमारिति 3) Thus N, G *śamīmayīm* 4) Thus G, N °दुम्बरी 5) Thus G; N Bh *samānam* 6) Thus N Bh, G om. *etām* 7) Thus Bh, G *sruv*, N om., Pr *punaḥ* 8) Thus Pr, G N °*āgnes* 9) Thus N Pr, G °*bhyāvartin agne*

मग्रमख्यदित्येतयापरं[1] चतुर्गृहीतं गृहीत्वा मनस्वत्या जुहोति मनो ज्योतिर्जुषतामित्येतयापरं चतुर्गृहीतं गृहीत्वा प्राजापत्या जुहोति प्रजापतय इत्येतयापरं चतुर्गृहीतं गृहीत्वा व्याहृतीभिर्जुहोत्येकैकशः समस्ताभिश्च' प्रत्येकं चतुर्गृहीतं[2] जुहुयादित्येके' यथा समादिष्टमित्यपरं' यथाकामी सर्वदर्विहोमेषु' जयाभ्यातानान्राष्ट्रभृत इति हुत्वा ॥ २ ॥

एतस्मिन्नेवाग्नावोदनं श्रपयित्वा चतस्रोऽन्नाहुतीर्जुहोत्यग्नये स्वाहाग्नये पवमानाय स्वाहाग्नये पावकाय स्वाहाग्नये शुचये स्वाहेति' नवेन च सस्ये सस्ये' तत्रेमाभ्य आग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्विष्टकृत्पञ्चमीभ्यो वा जुहोतीन्द्राग्निभ्यां स्वाहा विश्वेभ्यो देवेभ्यः[3] स्वाहा सोमाय स्वाहा द्यावापृथिवीभ्यां स्वाहाग्नये स्विष्टकृते स्वाहेति' पुरस्तात्स्विष्टकृत उपहोमं जुहोति शतायुधाय शतवीर्यायेति पञ्च' ततो ब्राह्मणान्भोजयेद्यावज्जीवमेतमग्निं व्रीहिभिर्यवैर्वा सायं प्रातः परिचरत्यग्नये[4] स्वाहेति सायं पूर्वामाहुतिं जुहोति प्रजापतये स्वाहेत्युत्तरां' सूर्याय स्वाहेति प्रातः प्रजापतये स्वाहेत्युत्तरामंश्च यदि

1) Thus N Pr, G *°akhyatyetayabaran* 2) Thus Bh, G N *caturgrhitair* 3) Thus N Bh, G *devatabhya* 4) Thus N Bh, G *paricaratv°*

प्रयियासेत्प्रवसथकल्पो व्याख्यातः' समित्समारोपणोपावरोहणमात्मन्यरण्योर्वा[1]' समित्समारोपणमेके समामनन्ति लौकिके चोपावरोहणं' व्याख्यातमेकाग्निविधानं' संतिष्ठत औपासनकल्पः संतिष्ठत औपासनकल्पः'॥३॥

अथातो व्रतादेशविसर्जने व्याख्यास्यामः' पर्वण्युदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे ऽग्निरूपसमाधानाद्याज्यभागान्ते होतृभ्यः स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा स्वयंभुवे स्वाहेति होतृषु' सांहितीभ्यो[2] देवताभ्य उपनिषद्भ्यः स्वाहा वारुणीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा सर्वाभ्यो[3] देवताभ्य उपनिषद्भ्यः स्वाहेत्युपनिषत्सु' चतस्रः पालाशीः समिधो घृतान्वक्ता आदधाति याज्ञिकानां वा वृक्षाणामन्यतमस्याग्ने व्रतपते होतृभ्यो व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा॥ वायो व्रतपत[4] आदित्य[4] व्रतपते व्रतानां व्रतपते होतृभ्यो व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेत्युपनिषत्सूपनिषद्भ्यो[5] व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेति' चित्तं च चित्तिश्चेति जयादि प्रतिपद्यते'

---

1) G °*samārohanamupāvarohanam*°, N °समारोपणोपावरोहणाव्वा°, Bh °*samāropanopāvarohane ātmany*° 2) Thus Bh, G *sāmhībhyo*, N साहितृभ्यो 3) Thus N, G *sarvebhyo* 4) Thus N, G °*patāditya* 5) G om from त्याहेत्यु° unto स्वाहेति l 17

परिषेचनान्तं कृत्वाथैनं संशास्ति ब्रह्मचार्यसि समिध आधेह्यपो ऽशान कर्म कुरु मा दिवा सुषुप्था भिक्षाचर्यं चराचार्याधीनो वेदमधीष्वेति ॥ ४ ॥

चत्वारिंशतमष्टौ[1] चतुर्विंशतिरिव[2] वा सर्वदेव[3] ब्रह्मचर्य ग्रहणान्तं वा वर्षाणि द्वादशावरार्ध्यमित्यपरं संवत्सरमेतद्व्रतं चरेत्संवत्सरे पर्यवेते ऽग्नेरुपसमाधानाद्याज्यभागान्ते यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादिति द्वे मिन्दाहुती जुहोति पूर्ववत्प्रधानाहुतीर्हुत्वा व्रतपतिभ्य[4] आधापयत्यग्ने व्रतपते होतृभ्यो व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहा ॥ वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते होतृभ्यो व्रतमचारिषं[5] तदशकं तन्मे ऽराधि स्वाहेत्युपनिषत्सूपनिषद्भ्यो[6] व्रतमचारिषं[5][6] तदशकं[6] तन्मे[6] ऽराधि[6] स्वाहेति चित्तं च चित्तिश्चेति जयादि प्रतिपद्यते परिषेचनान्तं कृत्वाथैनं व्रतान्ते ऽध्यापयते श्रावयते वा महा[7] होतार[8] उपनिषद[8] इति

---

1) Thus Bh, G *catvarimśamastau*, N चत्वारिंशति सप्तौ

2) Thus G N Bh   3) Thus Bh, G *sarıadhaiva*, N सर्वविद

4) Thus N, G *pratıpatıbhya*   5) Thus G, N °चार्यं

6) G om , N ıns this passage before स्वाहा वायो व्रतपत l 10, see, however, p 71 l 13—l 17   7) Thus G, N om

8) G *tara upanıda*, N होतारोपनिषद, Bh *hotāra upanıṣad*

संतिष्ठते व्रतादेशविसर्जने संतिष्ठते[1] व्रतादेशविसर्जने[2]' ॥ ५ ॥

अथातो[3] ऽवान्तरदीक्षां व्याख्यास्यामः 'पर्वण्युदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे ऽपराह्णे केशश्मश्रू वापयित्वा प्राचीमुदीचीं[4] वा दिशमुपनिष्क्रम्य[5] खिले[5] ऽच्छदिर्दर्शे[6] ऽग्निमुपसमाधाय संपरिस्तीर्य पूर्ववदुपाकृत्य मदन्तीरुपस्पृश्य प्रथमेनानुवाकेन शान्तिं कृत्वा चतस्र औदुम्बरीः समिधो घृतान्यक्ता आदधाति पृथिवी समिदित्येतैर्मन्त्रैरथ देवता उपतिष्ठते ऽग्ने व्रतपते शुक्रियं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते शुक्रियं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामित्यथैनं सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति प्रथमोत्तमयोर्वा[7]' जयादि प्रतिपद्यते 'परिषेचनान्तं कृत्वा मदन्तीरुपस्पृश्योत्तमेनानुवाकेन शान्तिं कृत्वा ततः संमीलयति वाचं च[8] यच्छत्यथास्याहतेन[9] वाससा शिरः[10] संमुखं[10] वेष्टयत्यस्तमित आदित्ये ग्रामं प्रपा-

---

1) Thus G N, read संतिष्ठेते 2) G N ins *iti* 3) N om. khaṇḍika 6 and 7 4) Thus G, Bh *prācim vodicim vā*, but cf p 75 l 17 5) G N Bh °*kramyākhile* 6) G *chadideśe*, Bh *chadirdeśe*, see, however, Āp Ś XV. 20 2, BŚ IX 19 294 6, see also introd 7) G ins. *kṛtvā* 8) G om 9) Thus emended, G om *athāsyāha*, see introd 10) Thus Bh, G *śirasi mukham*

दयति' वाग्यत एतां रात्रिं तिष्ठत्यास्ते वा' श्वो भूते खिले ऽच्छदिर्दर्शे[1] ऽग्निमुपसमाधाय संपरिस्तीर्याथास्य षड्यमभिविदर्शयति[2] सप्ततयमित्येके ऽग्निमादित्यमुदकुम्भमश्मानं वत्सं महानग्नां हिरण्यं सप्तममपि वादितस्त्रीण्यभिविदर्शयति[3]' तत आदित्यमुपतिष्ठते वयः सुपर्णा इत्येतयात्रैतद्वासो गुरवे दत्वाथास्य ब्रह्मचर्यमधि नित्ये[4]' न नक्तं भुञ्जीत' यदि भुञ्जीतापज्वलितं भुञ्जीत' न मृन्मयं[5] प्रतिधयीत' न स्त्रिया[6] न[6] शूद्रेण[6] सम्भाषेत' न चक्रीवत्तमारोहेन्नं कूपमवरोहेन्नोपानहौ न छत्रं धारयीत' न समाजमीक्षेत न हर्म्याणि न शरीराणि न शवं नान्तावसायिनम्[7]' ॥ ६ ॥

संवत्सरमेतद्व्रतं चरेत्संवत्सरे पर्यवेते खिले ऽच्छदिर्दर्शे[8] ऽग्नेरुपसमाधानाद्याज्यभागान्ते द्वे मिन्द्राहुती हुत्वा पूर्ववत्प्रधानाहुतीर्जुहुयान्मंदन्तीरुपस्पृश्य[9] प्रथमेनानुवाकेन शान्तिं कृत्वा तत आवृत्तैः पृथिवी समिदित्येतैर्मन्त्रैश्चतस्र औदुम्बरीः समिध आधायावृत्तेर्देवता उपतिष्ठते'

---

1) G Bh *chadırdeśe* 2) Thus Bh, G *abhıdarśayatı* 3) G *°darśatı*
4) G *tıṣthete*, Bh *nıtya*, but see Ap Ś XV 20. 11, 12, H Ś XXIV 15
5) Thus emended, G *mrnmam*
6) G *strıśūdrena*, see BŚ IX. 16 296 10, Āp Ś I c. 16
7) Thus Bh, G *nāntāvasāyıkam* 8) G Bh *chadırdeśe*
9) Thus Bh, G *°juhuyāmantır°*

ज्येनं सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति प्रथमोत्तमयोर्वोत्तमेन शान्तिं कृत्वा तयादि प्रतिपद्यते' परिषेचनान्तं कृत्वैनं संशास्ति ब्रह्मचार्यसीत्याव्रतावसायिनमित्यन्तं[1]' पूर्ववदुद्देशः' ॥ ७ ॥

अथात उपाकरणविसर्जने व्याख्यास्यामः' श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां[2] वोपाकर्माग्नेरुपसमाधानाद्याज्यभागान्ते काण्डर्षीञ्जुहोति काण्डनामानि वा प्रजापतये काण्डर्षये स्वाहेति प्राजापत्यानां प्रजापतये स्वाहेति वा सोमाय काण्डर्षये स्वाहेति सौम्यानां सोमाय स्वाहेति वाग्नये काण्डर्षये स्वाहेत्याग्नेयानामग्नये[3] स्वाहेति वा विश्वेभ्यो देवेभ्यः काण्डर्षिभ्यः स्वाहेति वैश्वदेवानां विश्वेभ्यो देवेभ्यः स्वाहेति वा स्वयंभुवे स्वाहेति' सर्वेषां सदसस्पतिर्द्वितीयस्त्रीनादितो ऽनुवाकानधीयते[4] काण्डादीन्वा[5] सर्वांस्त्र्यहमेकाहं[5] वाजाम्यितायाधीयीत' मासं प्रदोषे नाधीयीत' तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गो ऽपि वा माघ्यां' सहान्तेवासिभिः प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य यत्रापः[6] सुखावगा-

---

1) G °antimasthānam° 2) Thus N Bh, G paurṇamāsyām
3) G ins. kāṇḍarṣaye 4) Thus MSS, read °यीरन् 5) Thus N, G om. kāṇḍādīnvā sarvān 6) Thus emended, G yatrāsūpasthānakāmyaḥ, N °सुपस्थान द्रा. यत्रापिन्त्व:, Bh yatrāpa svapagāhe

द्रा[1] अवकिन्यः[1] शंखिन्यस्तत्र गत्वापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन मार्जयित्वा[2] ॥ ८ ॥

अघमर्षणेन[3] त्रीन्प्राणायामान्धारयत्यृतं च सत्यं चाभीद्धात्तपसो[4] ऽध्यजायत । ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो सुवरिति दर्भानन्यो ऽन्यस्मै प्रदायायासनानि कल्पयन्ते ब्रह्मणे प्रजापतये ऽग्नये बृहस्पतये वायवे सूर्याय चन्द्रमसे नक्षत्रेभ्य इन्द्राय राज्ञे सोमाय राज्ञे यमाय राज्ञे वरुणाय राज्ञे वैश्रवणाय राज्ञे रुद्राय स्कन्दाय विष्णवे ऽश्विभ्यां[5] धन्वन्तरये वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः साध्येभ्य ऋभुभ्यो भृगुभ्यो मरुद्भ्यो ऽथर्वभ्यो ऽङ्गिरोभ्य इति गणानाम् ॥ ९ ॥

विश्वामित्राय जमदग्नये भरद्वाजाय गौतमायात्रये वसिष्ठाय कश्यपायारुन्धत्यै कल्पयामीति' दक्षिणतो ऽगस्त्याय[1]

---

1) See note 6, p 75 2) Thus N Bh, G om 3) Thus Bh, G *aghamarṣaṇam*; N घम र्षणेन 4) G abbreviates 5) Thus emended, G N *śvabhyān* 6) Thus N; G *gastyāyantyuttarataḥ*

कल्पयन्त्युत्तरतः[1] कृष्णद्वैपायनाय जातूकर्ण्याय[2] तरुक्षाय[3] वृहदुक्थाय[4] तृणबिन्दवे सोमश्रवसे सोमशुष्मिणे वाजश्रवसे वाजरत्नाय वर्मिणे वरूथिने सत्ववते[5] हर्यज्वने वामदेवायोदमयायर्णंजयायर्तंजयाय[6] कृतंजयाय[7] धनंजयाय बभ्रवे त्र्यरुणाय त्रिवर्षाय[8] त्रिधातवे श्वयज्ञाय[9] पराशराय वसिष्ठायेन्द्राय मृत्यवे कर्त्रे त्वष्ट्रे[10] धात्रे विधात्रे सवित्रे सुश्रवसे सत्यश्रवसे सावित्र्यै छन्दोभ्य ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्वाङ्गिरोभ्य[11] इतिहासपुराणेभ्यः[12] सर्पदेवजनेभ्यः सर्वभूतेभ्यश्च कल्पयामीति' ॥ १० ॥

दक्षिणतः प्राचीनावीती वैशम्पायनाय फलिङ्गवे तित्तिरय[13] उखायात्रेयाय[13] पदकाराय[14] कौण्डिण्याय वृत्तिकाराय कण्वाय बोधायनाय भरद्वाजाय सूत्रकारायापस्तम्बाय[15] सर्वेभ्यः सूत्रकारेभ्य आचार्येभ्य ऋषिभ्यो वानप्रस्थेभ्य ऊर्ध्वरेतोभ्य[16] एकपत्नीभ्यश्च[17] कल्पया-

1) See note 6, p 76 2) G *ṛtukarṇāya*, N ऋतुकर्णाय; see HG II. 19 6 3) Thus N, G *rukṣāya* 4) G °*utthāya*, N वृहदुक्थाय 5) G *sananmate*, N सन्वन्ते 6) Thus N, G °*devāya udamināya audamāya ṛnanjayāya trnanjayāya* 7) Thus N, G *ghṛtanjayāya* 8) Thus N, G *traruṇāya* 9) Thus G, N स्वज्ञाय 10) Thus G, N धर्त्रे; see also HG II 19 6 11) Thus G; N °वायर्वा-घोरायाङ्गिरोभ्ये 12) Thus N, G *itipurāṇebhyas* 13) G °*ukhāyātreye ātreyāya*, N तित्तिरायोखायात्रेयाय 14) Thus G, N पाद° 15) N ins. पुरन्दराय 16) Thus N, G °*retasobhya* 17) Thus G, N हेकपत्नीभ्य

मीति । यथास्वं[1] पितृभ्यश्च कल्पयन्ति मातामहेभ्यश्च पृथक्पृथगित्येतैरेव नामधेयैर्गन्धपुष्पधूपदीपान्नफलोदकैरमुष्मै[2] नमो ऽमुष्मै नम इति गन्धपुष्पधूपदीपैरमुष्मै[3] स्वाहामुष्मै स्वाहेत्यन्नेनामुं तर्पयाम्यमुं[4] तर्पयामीति फलोदकेनात्र नमस्यन्ति । त्रीनादितो ऽनुवाकानधीयन्ते[5] काण्डादीन्वा सर्वान्काण्डात्काण्डात्प्ररोहन्तीति द्वाभ्यामुदकान्ते दूर्वा रोपयन्त्यंथोदधिं कुर्वन्त्युन्नम्भय[6] पृथिवीमिति हस्तेन संसर्गास्त्रिरुद्धिध्या[7] तमितोराजि[8] धावन्त्येवं पारायणसमाप्तावनश्नत्पारायणमधीत्यैतत्कुर्वन्त्युदकान्ते[9] दूर्वारोपणोदधिधावनवर्ज[10] । प्रत्येत्य गृहान्ब्राह्मणान्भोजयेदपूपैर्धानाभिः सक्तुभिरोदनेनेत्येवमेवाद्भिरहरहर्देवानृषीन्पितृंश्च[11] तर्पयेत्तर्पयेत् । ॥ ११ ॥

सर्वेषु पाकयज्ञेषु स्त्रियाश्चानुपेतस्य बलिमन्त्रो न विद्यते । ऽपि वा स्त्री जुहुयान्मन्त्रवर्ज[12] न[13] चानुपेत ।

1) Thus N, G *yathāsvayam* 2) G °*d'paithah phalodakairamuṣmai*, N Bh °दीपान्नफलैरमुष्मै 3) N om गन्धपुष्पधूपदीपैर् 4) G om 5) Thus MSS read °धीयते 6) Thus Bh, G *kuriannunnambhaya*, N कुर्वन्त्यु° 7) Bh *samsargām*°, G *samsargā triruddhyā* N सगात्त उद्धिध्या 8) Thus N Bh, G °*ajan* 9) Thus Bh G *pārāyanasamāptau ianaśnan pārāyanamadhīte tat*°, N पारायणा समाप्तौ वानश्नत्वा°, see Āp Dh Ś I 27 9
10) Thus N Bh, G corr 11) Thus Bh, G °*pitrīmśca*, N पितृंश्च
12) Thus Bh, G *juhuyāmantraiarjanan*, N जुहुयात् न मन्त्रर्जने
13) N om

उपेतो व्याख्यातो ' गृहमेधिनो यदशनीयस्य[1] होमा बलयश्च स्वर्गपुष्टिसंयुक्तास्तेषां मन्त्राणामुपयोगे द्वादशाहमधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं चोत्तमस्यैकरात्रमुपवासः ' श्वो वैश्वदेवं निर्वपेद्युक्तो वा स्वयं निर्वपेद्देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां विश्वेभ्यो देवेभ्यो जुष्टं निर्वपामीति त्रिर्यजुषा तूष्णीं चतुर्थं ' पत्नी प्रयता फलीकरोति ' पत्न्या उपदिशति ' प्रक्षालितपाणिपादाधिश्रयीत[2] शृतं[3] वेदयीत[4] ' भूतमिति भर्तुः प्रतिवेदयते ' तत्सुभूतं विराडन्नं तन्मा क्षायीति वचनमभिघार्योद्वास्य प्रतिष्ठितमभिघार्योपरिष्टादद्भिर्मार्जयित्वाधस्ताद्धोमयेन ' नात्रेध्माबर्हिर्भवति नाघारौ नाज्यभागौ ' व्याहृतीभिश्चतस्रः समिधो ऽभ्याधाय परिषिच्य हस्तेन जुहोत्यग्नये स्वाहा सोमाय स्वाहा प्रजापतये स्वाहा धन्वन्तरये स्वाहा ध्रुवाय स्वाहा ध्रुवाय भौमाय[5] स्वाहा ध्रुवक्षितये स्वाहाच्युतक्षितये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः स्वाहाग्नये स्वाहाग्नये ऽन्नवते स्वाहाग्नये ऽन्नादाय स्वाहाग्नये स्विष्टकृते स्वाहेति ' व्याहृतीभिर्हुत्वे-

1) Thus Bh, G °aśanīyasya, N °शनीयस्य 2) Thus emended, G °pāṇipādo adhi°, N °पाणिपादाधायधिश्रयाति, Bh °pāṇipādāmadhi°
3) G Bh śritam, N श्रितं 4) Thus G, N वेदयते, Bh vedayeti
5) Thus N, G bhūmāya

कैकशः समस्ताभिश्च 'मा नस्तोके[1] तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते स्वाहा ॥ कामाय स्वाहा मन्यवे स्वाहेत्यथ परिषिञ्चति मन्त्रांश्च संनमति[2] ' ॥ १२ ॥

अपरेणाग्निं हस्तेन परिमृज्य धर्माय स्वाहाधर्माय स्वाहा ध्रुवाय स्वाहा जयाय स्वाहेत्यन्नं[3] प्राणः[3] प्रजापतिः[3] परमेष्ठिने[3] स्वाहेत्युखायामद्भ्यः स्वाहा वरुणाय स्वाहेत्युदधान्यां ' रुद्राण्यै स्वाहा रुद्राय स्वाहेति रुद्राण्यां ' भूः स्वाहेति सर्वदेवताभ्यो ऽन्तरिक्षाय स्वाहौषधिवनस्पतिभ्यः स्वाहेति मध्ये ऽगारे ' कामाय स्वाहेति शयनदेशे ' वनस्पतिभ्यः स्वाहेति स्थूणादेश[4] ' ओषधिवनस्पतिभ्यः[4] स्वाहेति[4] स्थूणाराजयोर्गृह्याभ्यः स्वाहा गृहपतिभ्यः[5] स्वाहावसानेभ्यः स्वाहावसानपतिभ्यः स्वाहेत्युत्तरपूर्वे देशे ' भूतेभ्यः स्वाहेत्युद्घाटे ' यदेजति जगति यच्च चेष्टति नाम्नो भागो यन्नाम्ने स्वाहेति संवदान्यामथ[6] देहल्यां मरुद्भ्यः स्वाहेति ' मध्ये धात्रे स्वाहा विधात्रे

1) G abbreviates 2) Thus N, G Bh *samnamayatı*

3) Thus G N, see MŚ II 3 4 31 18

4) G om 5) Thus N, G *gṛhyapatıbhya*

6) Thus G Bh, N *सधन्यामथ*

स्वाहेति द्वयोर्वाक्ययोर्गृहादुपनिष्क्रम्याह्ने स्वाहा रात्र्यै स्वाहेत्यथोपलब्धे[1] पिङ्गाण्यै स्वाहा पिङ्गाण्यै स्वाहेति पिङ्गाण्यां' विष्णवे स्वाहा विष्णवे स्वाहेत्युलूखलमुसले' अनसे[2] स्वाहेति शकटे[3][4]' सोमाय[3] स्वाहेति[3] धान्ये[5]' श्रियै स्वाहा पुष्ट्यै स्वाहेति धान्यनिचये' अथ प्रदक्षिणं बलिं निनयति प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहाग्नेय्यै दिशे स्वाहा नैर्ऋत्यै दिशे[3] स्वाहा वायव्यै दिशे स्वाहैशान्यै[6] दिशे स्वाहा ब्रह्मणे स्वाहा प्रजापतये स्वाहेति मध्ये' ॥ १३ ॥

इन्द्राय स्वाहेन्द्रपुरुषेभ्यः स्वाहेति पुरस्ताद्यमाय स्वाहा यमपुरुषेभ्यः स्वाहेति दक्षिणतो' वरुणाय स्वाहा वरुणपुरुषेभ्यः स्वाहेति पश्चात्सोमाय स्वाहा सोमपुरुषेभ्यः स्वाहेत्युत्तरतो[7]' अग्नये स्वाहेति[8] पुरस्ताद्यमाय[8] स्वाहेति[9] दक्षिणतो[9]' वरुणाय स्वाहेति[10] पश्चात्सोमाय[10] स्वाहेत्युत्तरतः' सप्तर्षिभ्यः स्वाहा सर्वभूतेभ्यः स्वाहेत्युत्तरपूर्वे देशे' अथ[11] दक्षिणतः प्राचीनावीती

1) G °labdhau, N °लब्धे, Bh alabdhe 2) Thus Bh, G anase, N अनसे 3) G om 4) Thus Bh, N शकटे 5) Thus N Bh, G dhānye 6) G aiśānyai, N स्वाहैशान्यै 7) G om uttarato 8) G om iti purastāt 9) G om iti dakṣiṇato 10) G om iti paścāt 11) Thus G Bh, N om

जुहोति पितृभ्यः स्वधा नमः पितामहेभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधा नमो मातामहेभ्यः स्वधा नमो मातुः पितामहेभ्यः स्वधा नमो मातुः प्रपितामहेभ्यः[1] स्वधा नम इति[2] त्रीनंनुगेभ्यः[3] स्वधा[3] नम[3] इति[3] मध्ये ऽप उपस्पृश्योत्तरतो यज्ञोपवीती जुहोत्यृग्वेदाय स्वाहा यजुर्वेदाय स्वाहा सामवेदाय स्वाहाथर्ववेदाय स्वाहाथर्वाङ्गिरोभ्यः स्वाहेतिहासपुराणेभ्यः स्वाहा सर्वदेवजनेभ्यः स्वाहा सर्वभूतेभ्यः स्वाहेत्यंथोर्ध्वं बलिं निनयति ये भूताः प्रचरन्ति दिवा बलिमिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहेति ' नक्तं बलिमिच्छन्त इति रात्र्यामथार्कंणीकपर्णेन बलिं निनयति येषां न[4] माता[4] पचते येषां रात्र्यां[5] समागमम्[6] । तेषामहं तु[7] भूतानां पिण्डं दास्याम्ययाचितः[8] ॥ भये मे ऽभयमस्तु दुर्भिक्षे च सुभिक्षणाम्[9] । जननमारके[10] मृत्युज्ञातिप्राये[11] चं का-

---

1) N ins स्वधा नमो मतुर्वृद्धप्रपितामहेभ्य 2) G om 3) N om ; G *trnugegebhya°*, Bh *trīn'nugebhyah°* 4) Thus G, N माता न, Bh om *na* 5) Thus N, G *rātryau*, Bh *rātrau* 6) G *samāgamama*, N गृहागम , Bh *samāgama* 7) G om 8) Thus N, G *dāndāsyāmyayacato* 9) Thus N, G *subhikṣe ca tān* 10) Thus N, G *janakamāraka* 11) G *mrtyutvayādiprāye*, N मृत्य°

ल्यतां[1] स्वाहेति 'पात्रसंक्षालनं निनयति निशि[2] श्रितेभ्यः[2] स्वाहा रुद्राय स्वाहेति वा[3] 'वैश्वदेवं कृत्वातिथिमाकाङ्क्षेतागोदोहनकालमग्रं[4][5] वोद्धृत्य निदध्यायंशो वा एष पञ्चमो यदतिथिः' ॥ १४ ॥

अपरेण गार्हपत्यमुपविश्याधीहि भो इत्युक्त्वा सावित्रीं सहस्रकृत्व[6] आवर्तयेच्छतकृत्वो वा 'दशवारं[7] वेदादीञ्जपेच्छन्दांसि[8] कूष्माण्डानि चाधियीताग्निमीळे[9] पुरोहितमित्यृग्वेदस्येषे त्वोर्जे त्वेति यजुर्वेदस्याग्न[10] आयाहि[10] वीतय इति सामवेदस्य शन्नो देवीरभिष्टय[11] इत्यथर्ववेदस्याग्निर्मूर्धेति छन्दांसि यद्देवा देवहेडनमिति[12] कूष्माण्डो 'यदधीते स ब्रह्मयज्ञो 'यज्जुहोति स देवयज्ञो 'यत्पितृभ्यः स्वधा करोति स पितृयज्ञो 'यद्भूतेभ्यो बलिं हरति स भूतयज्ञो 'यदतिथिभ्यो ऽन्नं ददाति स मनुष्ययज्ञ इत्येते[13] वै पञ्च महायज्ञाः[14] सतति[15] सुप्रयुक्ता नयन्ति परमां गतिम्'

---

1) Thus G, N ल्यतां; read perhaps ल्यता 2) Thus emended; G Bh *śih śilebhya*, N शिनि शिश्रितेभ्य 3) Thus N; G *yo* 4) Thus G Bh, N °मांगाकांक्षेत° 5) Thus N, G *°kālamātram*, Bh *°kālamātra-magram* 6) Thus N, G om. *krtva* 7) Thus G, N दशवारं 8) Thus G, N वेदादीञ्छन्दांसि 9) G om. from here unto यदधीते l. 11 10) Thus Bh, N °स्याग्न आयाह 11) Thus emended, N देवीरभिष्टय 12) Thus emended, N देवहेडनम 13) Thus N Bh, G *etu* 14) Thus N Bh; G *mahāyajñās* 15) Thus N Bh, G *satatam*

एतेभ्यो यस्य[1] पञ्चभ्यो[1] यज्ञ एको ऽपि हीयते ।
मनस्वत्याहुतिस्तस्य प्रायश्चित्तं विधीयते ॥

द्व्यहं त्र्यहं वापि प्रमादादकृतेषु तिस्रस्तान्तुमतीर्हुत्वा चतस्रो वारुणीर्जपेद्दशाहं द्वादशाहं वा विच्छिन्नेषु[1] स्वस्त्ययनेषु[2] तु सर्वशश्चतस्रो ऽभ्यावर्तिनीर्हुत्वा कार्यस्तान्तुमतश्चरुः'

यस्य स्त्री वानुपेतो वा गृहेष्वेतान्बलीन्हरेत् ।
कूष्माण्ड्यस्तत्र होतव्या हुत्वा[3] यज्ञसमृद्धये ॥
प्रवासं गच्छतो यस्य गृहे कर्ता[4] न विद्यते ।
पञ्चानां महतामेषां स यज्ञैः सह गच्छति ॥
प्रवासे कुरुते चैतान्यदन्नमुपपद्यते ।
न चेदुत्पद्यते त्वन्नमद्भिरेनान्समापयेत् ॥
अद्भिरेव व्रतं कृत्वा यथालाभमनुव्रतः[5] ।
देवानां देवयज्ञेन द्विजो गच्छति सात्मताम् ॥
पितॄणां पितृयज्ञेन भूतियज्ञेन भूतीनाम्[6] ।
मनोर्मनुष्ययज्ञेन ब्रह्मयज्ञेन ब्रह्मणः ॥
एतेषां सात्मतां गत्वा देवतानां शतं समाः ।
आनन्दं ब्रह्म गच्छन्ति ध्रुवं[7] शाश्वतमव्ययम्[8] ॥

इति ॥ १५ ॥

---

1) G om 2) N om 3) Thus MSS, read perhaps हुता 4) Thus N Bh, G *kartta* 5) Thus N Bh, G °*anuvratām* 6) G *bhūtinah*, N भूतिनां 7) Thus N, G *dhrutam* 8) Thus N Bh, G *śaśvatam*°

नान्दीश्राद्धस्य पूर्वपक्षे यथोपदेशं पूर्वेद्युर्वा युग्मान्ब्राह्मणान्भोजयित्वा प्रदक्षिणमुपचारो ' ऽग्निमिद्ध्वा[1] दूर्वाभिः संस्तीर्य भोजनस्थानेषु च पवित्रे[2] कृत्वा[2] पात्रे[2] निधायोत्पूय[2] यवान्निधाय प्रणीतावदुपचारं हविष्यं च दध्योदनं चासाद्य नान्दीमुखाः पितरः प्रीयन्तामित्यपां प्रतिग्रहणं विसर्जनं च ' पश्चादेवं विश्वेभ्यो देवेभ्यो ' नान्दीमुखेभ्यः पितृभ्यः स्वाहेति हुत्वोपस्तीर्य सर्वं द्विर्द्विरवद्यत्यभिघार्य वैष्णव्यर्चोपस्पर्शयित्वाचान्तेषु पूर्णपात्रं दत्त्वा गोमयेनोपलिप्य दध्योदनशेषं यवोदकेनावोक्ष्य न्युप्य पश्चात्परिषेचनं ' संपन्नमिति पृष्ट्वा[3] देवकृरित्यनुवाकशेषं[4] जपेद्ब्राह्मणान्भोजयित्वाशिषो वाचयति ' ॥ १६ ॥

संवत्सरे सपिण्डीकरणमेकादशे मासि षष्ठे चतुर्थे द्वादशे ऽहनि ' यदि पुण्याहकाल उपव्यावर्तेत पितृणामावाहनं[5] ' सव्यस्य पाणेरङ्गुष्ठेनोपमध्यमया चाङ्गुल्यालभ्य पृथिवीं जपेद्ये पार्थिवासः पितरो ये अन्तरिक्षे ये दिवि ये वामृता बभूवुः । ते अस्मिन्यज्ञे अमृता मादयन्तामिति ' चत्वारि पात्राणि सतिलगन्धोदकेन पूरयित्वैकं प्रेतस्य

---

1) Thus Bh, G N *iddhvā* 2) Thus Bh, G *pātre kṛtvotpūya*, N पवित्र कृत्वोत्पूय 3) Thus N Bh, G *spṛṣṭvottha* 4) Thus N Bh G *devabhū°* 5) Thus G, N °नावाहन

त्रीणि पितॄणामेकं वा पितॄणां प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना ये सजाता इति द्वाभ्यामसौ पितृभिः पितामहेभिः प्रपितामहेभिः सहैतत्ते तिलोदकं तस्मै ते स्वधा नम इति तिलोदकप्रदानमग्नौकरणमनुदेशनीयं च यथार्थमूहेदासेचने' सपिण्डी[1] व्याख्याता' यथाश्रद्धं[2] दक्षिणा भवन्त्यत ऊर्ध्वं मासिश्राद्धेन' ॥ १७ ॥

अथ गृह्यप्रायश्चित्तानि' यानि स्मर्यन्ते तानि वक्ष्यामः' शेषाणि वैतानिकानि स्रुद्धोमदेवतायाः समाम्नानात्फलश्रुतेश्च[3]' या एवाग्निहोत्रे देवतास्ता औपासने य एवाहिताग्नेर्धर्मः स एव धर्मो य एवाहिताग्नेर्लौकिकः स एवौपासनिकस्येति शाट्यायनिब्राह्मणं भवति' तत्र ये पुरोडाशास्त इह चरवः' पयोदधिपृषदाज्यानामाज्यवत्संस्कारो' न दध्नो ऽधिश्रयणं' प्रत्यसने परिषेचनमद्भी[4]' रौद्रराक्षसनैर्ऋतपैतृकछेदनभेदनखनननिरसनावघ्राणात्माभिमर्शनानि च कृत्वाप उपस्पृशेत्सर्वत्र स्कन्ने भिन्ने क्षामे दग्धे विपर्यासे ऽत्तरिते च द्वे मिन्दाहुती जुहोति यन्म[5] आत्मनो[5] मिन्दाभूत्पुनरग्निश्चक्षुरदादिति[5] द्वाभ्यामथ[5]

---

1) Thus Bh, G *sapindah*, N पिण्ड 2) Thus N Bh, G °*śrāddhan*
3) G *sāmnātāt*°, N °पंचश्रुतेभ्य ; Bh *samāmnāt*° 4) G *parivesanam*°, N प्रतिवेषणम्°, Bh *pratisecanam*° 5) G om unto *atha* I 17

स्कन्ने सं त्वा सिञ्चामीति स्कन्नमभिमन्त्र्योन्नम्भय पृथिवीमित्यपो[1] ऽभ्यवहृत्य[2] भूरित्युपस्थायास्कान्द्यौः पृथिवीमित्याहुतिं[3] जुहोत्यथवान्यं[4] चेद्देवाञ्जनमगन्यज्ञ[4] इति चानुमन्त्रणं किं चिच्च[5] दृष्यादिन्ने[5] भूमिर्भूमिमगादिति भिन्नमभिमन्त्र्योन्नम्भय पृथिवीमित्यपो ऽभ्यवहृत्य[6] त्रयस्त्रिंशत्तन्तव इत्येतया जुहुयादग्नौप्रक्षेपणं दारुमये ऽप क्षामि निर्ऋत्यै त्वेति विदग्धमभिमन्त्र्य त्वं पराची त्वमवाची त्वं रक्षांसि[7] गच्छेति दक्षिणापरमुत्तरापरं वा दिशं तं प्रति निरस्यत्यग्नी रक्षांसि सेधतीति तिस्र आज्याहुतीर्जुहुयात् ॥ १८ ॥

अहुत्विष्य[8] आगमनमन्यस्यैकदेशश्चेद्दुष्कृत्येतत्कृत्वैतया[9] जुहुयादेतेनाशृतदुःशृते[10] व्याख्याते ऽपो ऽभ्यवहरेयंत्र[11] घ्न[11] चेन्धनमभावादध्यात्स्वाहाकारेणाद्यातीति[11] [12] विज्ञायते रुद्राय त्वेत्यशृतमभिमन्त्र्य यमाय त्वेति दुःशृतमेव परिस्तरणदाहे ऽग्नये क्षामवते नमो नमः क्षामवा-

1) Thus N Bh, G °upo 2) Thus G, N ऽभिगच्य, Bh bhyavaneya
3) G om. from here unto juhuyād I 6. 4) Thus Bh, N °त्यन्न दाज्ञो च देवो गमन्ते न्न 5) Thus Bh, N चिच्च दृष्टादृष्ट भिन्न
6) N ऽभ्यवहृत्य, Bh hyapasrtya 7) Thus Bh G ukṣāmi, N om
8) Thus N, G harṇya, Bh haritya 9) Thus G N चा---न्नें त्वानैत°, Bh agamanasya anyasya 10) Thus N Bh, G °śrutamśrute
11) Thus Bh, G °cyanam°, N °दरेदेनानुरयेधा° 12) Thus N Bh
G °kārena juhotets

न्मा मा[1] हिंसीन्मा मे गृहं मा मे धनं मा मे प्रजां मा मे पशूनित्यभिमन्त्र्याग्नये क्षामवते नमो नम इत्याहुतिं जुहुयादिन्द्रं वो विश्वतः परीति पुनः परिस्तीर्येन्द्राय स्वाहेत्याहुतिं जुहुयादथ परिधिदाहे प्रदाव्यायाग्नये[2] नमो[2] नमः[2] प्रदाव्यायेति[2] 'समानमत ऊर्ध्वमग्नेः[3] समिदसीति[4] पश्चार्धं यमस्य समिदसीति दक्षिणार्धे सोमस्य समिदसीत्युत्तरार्धमिन्धानास्त्वा शतं हिमा इत्याहुतिं जुहुयादृष्टे ऽन्यं परिदध्याद्गन्धर्वो ऽसीति प्रतिमन्त्रमथ विपर्यासे त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजापत इति चतस्र आहुतीर्जुहुयादेता[5] एवान्तरिते[5] मनो ज्योतिर्जुषतामिति पञ्चमीमन्तरितं च कुर्यात्संस्थिते[6] चेज्जानीयात्किं चिच्च दद्यात्' ॥ १९ ॥

उत्तरस्मिन्काल आगते होमश्चेति[7] निवृत्तः[7] पूर्वस्य सेयं कालातिपत्तिस्तस्यां प्रायश्चित्तं मनो ज्योतिरिति पूर्वस्य हुत्वापरस्य जुहुयादेवं प्रतिहोममा दशरात्रात्प्राणायामश्चैकादशीप्रभृत्या विंशतिरात्रादुपवासश्चा त्रिंशद्रात्राद्त

---

1) G om , N मा मामिरक्षन् 2) Thus N Bh, G *pradāvyāyeta*

3) Thus N Bh, G °*agnaye* 4) Thus N Bh, G *samlsadasīti*

5) Thus Bh, G °*etā etāntarite*, N °यादेतासा नारुणे

6) Thus N Bh, G *kāryyāt*° 7) Thus G Bh, N होमश्रोदिति°; these words seem to be corrupt, read perhaps होमश्चेदनिवृत्त

ऊर्ध्वमा षष्टिरात्रात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वं प्राजापत्यं विहितमेकादशीप्रभृति तिस्रश्च[1] तन्तुमतीस्तन्तुं तन्वन्नु-द्बुध्यस्वाग्ने त्रयस्त्रिंशत्तन्तव इत्युक्तमनुगत[2] इत्यपि[2] वा-यामाग्ने[2] ऽसीति जुहुयाद्वा त्रिरात्रान्मनो ज्योतिरित्या सप्तरात्रादत[3] ऊर्ध्वमा द्वादशरात्रात्तिस्रो[4] रात्रीरुपवसेदत ऊर्ध्वं प्राजापत्यं विहितमेकादशीप्रभृति तिस्रश्च तन्तुमती-रुक्तं द्वादशाहं विच्छिन्न इत्येकादशीप्रभृत्युपवासः पूर्व-वत्' ॥ २० ॥

अथ पर्वण्यतीते मनो ज्योतिरयाश्चाग्ने[5] यदस्मिन्नग्ने स्वस्ति न इन्द्र इति चतस्र आज्याहुतीर्हुत्वा स्थालीपाकं च कुर्यात्प्रागष्टम्या' अत ऊर्ध्वं सोपवासः कार्यो[6] द्वयो-र्द्वौ[6] त्रिषु[7] त्रय इत्येवं नैमित्तिकेष्वतीतेषु प्रायश्चित्तं' पार्वणावद्धोमः' पितृयज्ञे ऽतीते पञ्चात्यये सोपवासः कार्य इति सिद्धं' नित्येषु चैवमेव स्यादथ महायज्ञानां' मनो ज्योतिरिति द्वयोस्त्रयाणां चतुर्णां[8] पञ्चानां वा' षष्ठप्रभृति तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीरिमं मे वरुण तत्त्वा यामि यच्चिद्धि[9] ते[9] यत्किं चेत्या नवरात्रादत

---

1) G om. from here unto tantumatīr l. 6   2) Thus Bh., N इत्युक्त-मनुगतोपयामाग्ने   3) Thus Bh, N सप्तरात्रादत   4) Thus Bh, N द्वादशरात्रा°   5) G Bh ins. sti   6) Thus N, G karyyorddhayor°   7) Thus N, G trṣu   8) G om   9) Thus N G yachid

ऊर्ध्वमा दशरात्राच्चतस्रो ऽभ्यावर्तिनीर्हुत्वा कार्यस्तान्तुमतश्चरुः' स्नातकस्यापि होमविच्छित्तावुक्तं' प्राप्ते प्राजापत्ये तस्य. विच्छित्तिस्तस्य तु पुनराधेयं' मनो ज्योतिस्तन्तुमतीः पुनस्त्वादित्या रुद्रा इति च पूर्णाहुतिं प्रतीयादेतामप्युपघातेषु सर्वत्र' स्त्रियाश्चैवं होमाभिगमनस्थालीपाकेषु' सर्वेषामन्ततो व्याहृतीरिति सिद्धं' नम आचार्येभ्यो नम आचार्येभ्यः' ॥ २१ ॥

॥ इति[1] भारद्वाजसूत्रे[1] तृतीयः[1] प्रश्नः[1] समाप्तः[1] ॥

॥ भारद्वाजीयं[2] गृह्यसूत्रं[2] समाप्तम्[2] ॥

---

1) Thus Bh, G ins *madācāryaviracite* behind iti, N om

2) G *om*, N श्रीभारद्वा°

LIST OF MANTRAS [1].

	P	
*akṣispando duḥsvapna iṣṭir asaṃpat	65	14
*agnaye kṣāmavate namo namaḥ	87	15
	88	2
*agnaye tvā paridadāmi	8	2
agnaye pavamānāya svāha	70	9
agnaye pāvakāya svāha	70	9
*agnaye pitṛmate svāhā	44	4
*agnaye 'mavate svāha	79	16
*agnaye medhapataye svāhā	4	10
agnir īśāna indro bṛhaspatiś ca	59	7
*agnir devānām adhipatiḥ	36	4
[2]) agniṣomā yaśo asmāsu dhattam	53	3
*agniṣ ṭa ācāryaḥ	7	10
agne vratapate śukriyaṃ vrataṃ cariṣyāmi	73	9
agne vratapate hotṛbhyo vrataṃ cariṣyāmi	71	13
agne vratapate hotṛbhyo vratam acāriṣam	72	9

---

1) This list comprises 1. the mantras not found in Bloomfield's Vedic Concordance, 2. the mantras differing more or less from the tradition hitherto known (when the beginning words are different from the usual tradition, the usual beginning is given in a foot-note).

The first kind of mantras are marked by an asterisk. After the manner of the concordance each quarter-verse is given separately, in alphabetic order.

2) agnīṣomā

	p.	l.
[1]) agnes tvā tejasā sūryasya varcasendrasyendriyeṇa viśveṣāṃ tvā *devānāṃ kratunābhimṛśāmi*	25	14
*achidrā kīrtir astu me	67	1
*atharvavedāya svāhā	82	6
*atharvāṅgirobhyaḥ svāhā	82	7
[2]) athārjīc chyāmaḥ śabalaḥ	38	8
athāsmabhyaṃ sarvavīrāṃ dāḥ	34	3
anase svāhā	81	4
*anugebhyaḥ svadhā namaḥ	82	4
[3]) anubhavaṃ paribhavam	65	12
[4]) anubhūtaṃ paribhūtam	65	12
antarikṣaṃ samaṃ tasya vāyur upadraṣṭā	46	12
[5]) annasya kulyā upa tān kṣarantu	49	15
annādyena bhagena ca	52	10
apa pāpmānaṃ jahi pāpmānaṃ mama cāmuṣya ca	57	15
apāṃ stoko abhyapatac chivena	64	11
[5]) *apūpakulyā upa tān kṣarantu*	48	4
*amṛte tvāmṛta ādadhāmi	68	4,7
[6]) abhi pūṣā niṣīdatu	18	13
[7]) abhibhuve sūryāya divyānām adhipataye svāhā	31	5
ayaṃ kumāro jarāṃ dhayatu dīrgham āyuḥ	26	6
arundhatīṃ dhruvatāṃ ye ha ninyuḥ	19	14
*arthaṃ mahyaṃ sādhaya	36	9
[8]) ardhamāsān vibhajantī	32	13
aryamṇaḥ kumbhīpātraḥ pātrapāṇir nipuṇiḥ	23	13
*arvācy āviśāsmān	59	1
*avapadyasvāsau	23	3
[9]) aśvavatī gomatī sūnṛtāvatī	33	11
*asuṅgamāḥ satyayujo 'vṛkāsaḥ	43	6

1) agnes tvā 2) arjiñ 3) anubavam 4) anuhūtaṃ
5) ājyasya *or* medasaḥ kulyā 6) api 7) abhibhūḥsaurya°
8) māsārdha° 9) aśvāvatī

	p	l
asau pitṛbhih pitāmahebhih prapitāmahebbih sahaitat te tilodakam	86	2
*aham saṃrādhani iti	5	3
[1]) ahimsann agna āgahi	65	8
ahir dadamśa kam cana	31	14
ahoratraih sa<samdhikaih	43	15
*āgatya babhruh piṅgākṣah	66	13
[2]) āganta saṃrabhavahai	7	14
āganta ma riṣeṇyatah	7	12
[3]) āgneyāya pāṇḍaraya pārthivānām adhipataye svabā	31	3
*āgneyyai diśe svāhā	81	8
ātmānaṃ paripaśyatah	55	6
*ā dhenavo bahula nityavatsah	28	9
*ā no havam pitaro dyāgamantu	43	7
āpah supteṣu jāgrata	26	10
āpo devih prahiṇuta	43	8
āpo bādhantām nirṛtim paracih	64	9
*āyāta pitāmahāh prapitāmahaś canugaih saha	43	5
[4]) āyāty aparāparam	32	12
*āyur me prāvocah	58	11
*āyur varco yaśo medhām tvayi dadhāmi	25	9
*āyuṣmān aham varcasvi yaśasvī śriman apacitiman bhūyāsam	58	13
ārāt te agnir jvalatu	65	1
*āvapatāhar ahar ā nirdaśatayai	24	12
*itihāsapurāṇebhyah svāhā	82	7
*idam annaṃ pūryataṃ cāpūryatām ca	47	5
idam aham amum āmuṣyāyaṇam indrasya vajreṇābhi viśāmi	62	14
idam aham amuṣyāmuṣyayaṇasya dviṣantam bhrātṛvyam upagūhāmi	52	1

1) ab bhrad agna 2) āgantrā 3) āgneyapāndu° 4) āyanty

	p	l
idaṃ vatsyāmah	61	9
indrapuruṣebhyah svāhā	81	11
imaṃ yajnaṃ pitaro no juṣantām	43	9
*ime gṛhāḥ prati jīveṣv asthuh	28	7
*īśānyai diśe svāhā	81	9
uccairvāji pṛtanājit	54	6
uttaro haṃ dviṣadbhyah	63	1
utsṛjemam śucīmanaḥ	39	7
upaniṣadbhyo vrataṃ cariṣyami	71	16
upaniṣadbhyo vratam acāriṣam	72	12
*upahūtaṃ goaśvam	28	10
upahūto gṛhesu me	28	11
ulena parimīdho si	61	2
*urjam bibhrato jagatah suśevāh	28	8
ūrjam bibhrad vah sumanāh suvarcah	28	4
ūrjasvatī payasvatī ghṛtavatī	33	12
ūrjasvatih payasvatīh	46	3
ūrjasvatiṃ payasvatim	48	12
ūrjā vah saṃsṛjami	28	11
ūrjam vahantih kṣiram udakaṃ ghṛtam payah kīlālaṃ parisrutam	46	1
*ṛgvedāya svahā	82	5
*ṛtam vṛṇ ṣva mavaryam	35	6
*ṛte tvāmṛta adadhāmi	63	4 6
ekavrātya śunaka sṛja chat	38	11
	39	3
*ekaśataṃ śṛṇor anga te dhapayitarah	27	3
etat te tatasau madhumad annam sarasvatah	44	11
etat te pitāmahasau madhumad annam sarasvatah	44	16
etat te prapitāmahāsau madhumad annam sarasvatah	45	6
*etam prāṇam apanihi	20	15
1) evaṃ kumāra ejatu	23	1

1) evam te garbha

	p	l
evam aham brāhmaṇānām vedeṣu nidhigopo bhūyāsam	10	10
*eha gacchantu pitaro haviṣe attavai	43	7
*eha vatsah krandatv ā kumārah	28	8
aulaba it tam upāhvaya	38	8
*kam upanayāmi	7	11
karad dadhac chivena tvā pañcaśākhena hastenāvidviṣāvatā sāhasreṇa yaśasvinabhimṛśāmi suprajāstvāya	20	17
kim jnānena kariṣyati	11	14
*kuberāya tvā mahārājāya paridadāmi	8	1
*kuberāya svāhā	36	9
kurkuro bālabandhanah	38	7
kulaś ca vikulaś ca	39	6
kṛśāś cid amariṣṇavah	7	13
*kṣayāya svāhā	80	7
1) kṣamavān mā mā himsīt	87	15
kṣemāya vah śivah śāntyai prapadye	28	13
2) khajabojopakāśinī	23	11
3) gandharvas tato parah	16	3
gandharvo gnaye dadat	16	5
*gṛhapatibhyaḥ svāhā	80	14
gomad dhanavad aśvavad ūrjasvat suvīravat	35	4
grāmaṃ sajānayo gacchanti	24	2
*cakṣuś ca pratipadyate	11	14
*jananamārake mṛtyujātipraye ca kalyatām	82	15
*jarām aśiya	52	16
	54	2
*jahi dviṣantaṃ hanīthā mama dviṣam	57	16
*jihīrṣāma	56	4
*jīva varṣasahasraṃ tvam	65	2
juhomi vaiśvakarmaṇim	5	2

1) mā mā 2) khajapo *or* bajābo° 3) gandharvas te *or* gandharvo v v da

	p	l
*juhomy annānāṃ rasam	67	1
[1]) jaitryāyāviśatān mām	54	5
*takṣakāya tvā vaiśaleyāya paridadāmi	8	2
tat satyaṃ yad ahaṃ vadāmi	59	10, 14
tad brāhmaṇair atipūtam anantam akṣayyaṃ me astu	49	10
tad vo aham punar āveśayāmy ariṣṭāh	44	1
*tan nah saha devair amṛtam astu	47	5
*tam tvaimi śaraṇaṃ deva	36	5
*tapah śraddhāyāṃ juhomi	37	1
tasmai te svadhā namah	86	3
*tāṃ vidyāt puṇyalakṣmīkām	11	14
[2]) tāṃ doham upajīvātha pitaraḥ	49	13
tām ito naśayāmasi	20	9
*tāṃ me juṣantāṃ pitarah sametāh	48	12
[3]) tuṇḍikera ulūkhalah	23	9
*te asmin yajñe amṛtā mādayantām	85	16
tekaś ca sasaramataṇḍulah	39	6
[4]) te tvā devā adur mahyam patnīm	15	14
tena te vapāmy asau	30	10
*tena vardhasva cenddhi	4	5
tena saṃvaninau svah	18	3
te no rayim sarvavīrāṃ niyacchantu	43	10
te mā śivena tigmena	64	6
teṣām saptānām iha rantir astu puṣṭyai	32	9
*teṣām aham tu bhūtanām	82	13
*tvam rogasyeśiṣe tvam u rogasya	27	3
[5]) tvam svadhām akṣitam taih sahopajīva	44	15
	45	4, 9
tvaṣṭā badhnātu bandhanaih	23	5
*tvatpūrtam iha jīvate	36	8

---

1) jaitryāyā° 2) tam 3) śāndikera *or* śaṇḍerathaś 4) mahyam tvādur 5) tam svadhām *or* tām tvam svadhām

	p	l
*tvaddattaṃ vai balaṃ rājye	36	7
*tvam parācī tvam avācī tvam rakṣāṃsi gaccha	87	7
tvaṃ piśaṅgalohitaḥ	39	7
*tvaṣṭā vīram adhāt	25	10
[1]) daśabhis tvāṅgulibhir abhimṛśāmi	22	14
[2]) divyo yo mānuṣo gandhaś ca	52	14
*diśo diśo jātavedaḥ	66	14
*durbhikṣe ca subhikṣaṇam	82	14
duḥsvapnaṃ duruditam śakunaiḥ	65	11
dṛḍhaś cid amariṣṇavaḥ	7	13
devasya tvā savituḥ prasave śvinor bāhubhyām pūṣṇo hastābhyāṃ viśvebhyo devebhyo juṣṭaṃ nirvapāmi	79	6
*devānām sambhṛto rasaḥ	66	16
[3]) devebhir vimitāsy agre	34	5
dyauḥ samā tasyādityа upadraṣṭā	46	15
*dhanur maṭacī puruṣasya hastayoḥ	27	2
*dhanvantaraye svāhā	79	13
*dhātre svāhā	80	17
*dhruvāya svāhā	79	14
	80	7
namaḥ pṛthiviṣade rudrāya vāteṣave rudrāya	63	4 10
namaḥ śakṛtsade rudrāya vāteṣave rudrāya	63	7
namas tatsade rudrāya vāteṣave rudrāya	63	12
*namas te stu vanaspate	65	3
namaḥ sarpasṛte rudrāya vāteṣave rudrāya	63	5
*na mṛtyuś caratīha	7	14
namo agniṣade rudrāya vāteṣave rudrāya	65	9
namo ntarikṣasade rudrāya vāteṣave rudrāya	64	1
namo psuṣade rudrāya vāteṣave rudrāya	63	14
namo rudrāya pṛthiviṣade	63	5 11
namo rudrāya sarpasṛte	63	6

1) ābhiṣ tvāham 2) da vyo *or* daivī 3) devo devebh *or* devī devebh r

	p	l
namo rudrāyagnısade	65	10
*nāndımukhebhyah pıtṛbhyah svahā	85	6
[1]) nıgṛhya bahu plavase	39	1
[2]) nıvṛtto vo nyavıvṛtat	60	2
*nıśı śrıtebhyah svahā	83	1
*naırrtvaı dıśe svahā	81	8
parımıḍho sy ulena	61	2
*pareṇaıtu parıksavah	65	14
*pareṇaıtu pāpaśakunıh	65	13
*paśunam vıśvarūpāṇām	66	15
*pınkṣāṇyaı svāhā	81	2
*pıṇdam dāsyāmy ayācıtah	82	14
pıtāmahebhyah svadhā namah	82	1
[3]) putrāms ca paśūmś ca	22	1
punas tvādıtya rudrāh	90	4
*purıṣyo havyavahanah	36	5
[4]) puruṣu prıyam kuru	54	9
*pustyaı svāhā	81	5
pumsavanam asy amuṣyaı	22	11
purva esām pıtaıtı	24	7
*prthıvyāṃ tvamrta adadhāmı	68 3	5
[5]) pṛthıvyām agnau pratıtısṭha vayāv antarıkṣe sūrye dıvı	61	12
*pracınvadbhyah svāhā	41	9
*pracınvanta upasprśata	41	9
*prajapata ımaṃ gopayāmum	8	4
[6]) prajāpataye tva hımkāreṇābhıjıghrāmı	29	5
*prajāpatıs ta āyur dadhatu	29	5
[7]) pratıgrhṇantu pıtarah samvıdānāh	48	1
pradāvyāyāgnaye namo namah pradāvyaya	88	4
[8]) pradoṣacārıṇī svasā	24	8

1) vıg hya 2) nıvarto yo 3) putrāmś caıva 4) pūruṣu
5) agnau prthıvyām 6) prajapates 7) p at nandantu
8) n śīthacārınī *or* naktamcār nī

	p	l
prapitamahebhyah svadhā namah	82	2
praviśatu bhavān āyuṣā varcasā śriyavṛtah	35	14
prasthāvāno māva sthatu samanyavah	7	12
*prājāpatyaṃ yaśo mahat	66	16
prāṇa āyuṣi vatsyāmah	61	9
*prāṇaya tvācāryāya paridadāmi	8	1
*prāṇeṣu tvamṛtaṃ juhomi	47	6
priyaṃ mā brāhmaṇe kuru	54	10
*preto mṛtyum nudāvahai	7	14
*babhrūya yaśasā saha	66	13
brahmaṇa kḷptaḥ sukṛtena	64	12
[1]) brahmaṇe tvā gṛhṇāmi	60	10
brāhmaṇāmś caturo nanagotrān bhojayata	58	2
*bhagena tvā samsṛjāmi	17	1
*bhaye me bhayam astu	82	14
*bhūtebhyah svaha	80	15
*bhūḥ prapadye bhuvaḥ prapadye śriyam prapadye	36	2
*madhunā ghṛtena svadhā stha	46	4
madhu he madhv agahe	18	1
mano medhāyāṃ juhomi	36	15
[2]) mama citte cittam astu te	17	14
mama vācam ekamanā śṛṇu	17	14
[3]) mayi puṣṭiṃ puṣṭipatir dadhatu	82	10
mayi prajnānam astu te	17	17
*mayi sarvāṇi bhūtani	17	17
*mahā hotāra upaniṣadaḥ	72	15
*mahyaṃ jivanam avaha	66	15
[4]) mahyaṃ dirghāyutvaya śataśaradāya	53	13
mahyam it punar ānayāt	60	5

1) prajāpatinā 2) mama cittam 3) *This mantra has been mentioned because in the Vedic Concordance it is registered under* mayi puṣṭim puṣṭapatir dadhātu *all the texts except AV reading (as Bhār does)* puṣṭipatir 4) dirghayutvāya

	p	l
ma gām adıtım vadhıṣṭa	58	8
*mām cakṣur mām u te manaḥ	17	16
*mām caıva paśya suryam ca	18	4
*matamahebhyah svadhā namah	82	2
mātā lohıtah pıtā	39	4
*mātuḥ pıtāmahebhyaḥ svadhā namah	82	3
*mātuḥ prapıtāmahebhyah svadhā namah	82	3
mā te putram rakṣo vadhıt	26	4
*mā devānāṃ mıthuyā kar bhagadheyam	67	3
[1]) mā na āyuḥ pramoṣıḥ	51	14
*mā no hımsıḥ kadā cana	35	6
mā no hıṃsır jātavedah	65	7
*mānyeṣu manah kṛthāḥ	18	4
*mām te cıttam pravıśatu	17	16
mā me gṛham mā me dhanam	88	1
ma me prajam mā me paśūn	88	1
*mam evānuvratā bhava	17	15
*māsareṇa surām ıva	17	1
[2]) māsīnām ūrjam uta ye bhajante	43	9
*mṛtyor mukham vıdadhāmı	37	1
medasvatı ghṛtavatī svadhāvatı	48	13
*medhām manası juhomı	36	14
*yajurvedāya svāhā	82	6
yathā tvam suśravo devanam vedeṣu nıdhıgopo sı	10	10
*yathāham sumate vasānı	66	15
yathaıva vātaḥ pavate	22	16
yad asmınn agne	89	9
yad ahaṃ dhanena prapaṇaṃ carāmı	59	5
yadı mām atımanyadhvam	60	3
yadı vrkṣad abhyapatat phalam	64	7
*yad ṛṣıṇaṃ tryayuṣam	30	8
	51	11

1) mā ma 2) māsīmām

	p	l
[1]) yad devagandharvo vittaḥ	18	3
[2]) yady antarikṣāt tad u vāyur eva	64	8
[3]) yad varco apsarāsu ca	52	13
yan madhuno madhavyam paramam annādyam rūpam tenāhaṃ madhuno madhavyena parameṇānnādyena rūpeṇa paramo 'nnādo madhavyo bhūyasam	57	7
yan me varcaḥ parāpatitam	55	5
yamapuruṣebhyaḥ svāhā	81	12
*yaśo me prāvocaḥ	58	12
*yasyaṃ mano 'nuramate	11	13
